
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ श्रीदानचंद्रिकायेदपुस्तकंच्यवकस्य ॥ ० ॥ ६ ॥

Acc. No. ~~1902~~. M-1834
Title - दान-चन्द्रिका.
Author - दिवाकर.
Date - ?
Subject - धर्म.
folio - 156
Xerox - 313

(A)

॥१॥ ॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥ ॥प्रणम्यमातरंगंगांभैरवंवनशंकरं म
हादेवाख्यपितरंश्रौतस्मार्तविशारदं १ दिवाकरेणसुधियासारमुद्धृत्यशास्त्रतः॥
शिष्टानांतन्यतेतुष्ट्यैदानसंक्षेपचंद्रिका॥२ तत्रपरस्वत्वोत्पत्त्यंतोद्रव्यत्यागोदानं॥
॥देवलः॥ अर्थिनामुदितेपात्रेश्रद्धयाप्रतिपादनं॥दानमित्यभिनिर्दिष्टंव्याख्यानं
तस्यकथ्यते॥ तच्चदानंसात्त्विकंस्मृतं॥ यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥ दी
यतेचपरिक्लिष्टंतद्राजसमुदाहृतं॥ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते॥ असत्कृ
तमविज्ञातंतत्तामसमुदाहृतं॥ ॥गारुडे॥ अहन्यहनियत्सुवर्णादिदानंतन्नैत्यिकंस्मृतं॥

॥१॥

2

आर्त्तानामभयंदद्यिस्येतद्विवाचिकंस्मृतं॥ विद्यामादायायेज्जप्येस्तद्दानंमानसंद्वि
जाइति॥ अथपात्रं॥ याज्ञवल्क्यः॥ नविद्ययाकेवलयातपसावापिपात्रता॥ यत्रवृत्त
मिमेचोभेतद्धिपात्रंप्रचक्षतइति॥ भविष्ये॥ किंचिद्वेदमयंपात्रंकिंचित्पात्रंतपोमयं
पात्राणामुत्तमंपात्रंशूद्रान्नंयस्यनोदरइति॥ व्यासः॥ प्रथमंगुरोर्दानंदत्वाश्रेष्ठम
नुत्तमात् ततोन्येषांचविप्राणांदद्यात्पात्रानुरूपतइति॥ भविष्यपुराणे॥ संनिधा
नस्थितान्विप्रान्दौहित्रंविट्पतिंनथ भगिनीयंविशेषेणतथावध्रूनदहागतान्॥ ना
तिक्रमेन्नरस्त्वेतान्सुमुर्खानपिगोपते॥ अतिक्रम्यमहारौद्रंरौरवंनरकंव्रजेत्॥ दक्षःस
ममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे सहस्रगुणमाचार्येत्वनंतंवेदपारगे॥ ब्राह्मणलक्ष

२

यमाह व्यासः ॥ ब्रह्मबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः ॥ जातिमात्रोपजीवी च भ
वेद्ब्राह्मणः स्तु ॥ ब्राह्मणब्रुवलक्षणमाह ॥ गर्भादानादिभिर्युक्तस्तथोपनयने
न च ॥ न कर्म विन्न चाधीतो ब्राह्मणब्रुव उदाहृतः ॥ अथ द्रव्यविभागः ॥ त्रिवाधर्मे
तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः वि
त्तस्य भागं पंचकं कृत्वा भागत्रयं जीवनार्थं भागद्वयं दानार्थमिति हेमाद्रिः ॥ अथ अग्र
सदानातु मत्स्यौदेः ॥ अजिनं म्रतशय्यां च मेषीं चोभयतोरवीं कुरुक्षेत्रे च गृह्णानो भ
स्मीन क्षयः पुरुषो भवेत् ॥ मनुः ॥ हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतं अविद्वान्प्र
तिगृह्णानो भस्मीभवति तत्क्षणात् अविधौ विद्वान्नाम विद्यातपोभ्यां हीनेन न ग्राह्यमिति

२

भाव: ॥ अथ दानकाल: ॥ वाराहे ॥ दर्शे शतगुणं दानं चतुर्गुणं दिनक्षये ॥ शतघ्नं तच्च
संक्रांतौ शतघ्नं विषुवे ततः ॥ युगादौ तच्छतगुणं अयने तच्छताभिहतं ॥ सोमग्रहे तच्छतघ्नं
तच्छतघ्नं रवेर्ग्रहे ॥ तच्छतघ्नं व्यतीपाते दानं वेदविदो विदुः ॥ विष्णुधर्मोत्तरे ॥ वैशाखी
कार्तिकी माघी पौर्णिमा तु महाफला ॥ पौर्णिमासीषु सर्वासु मासर्क्षसहितासु च ॥ आर्त्ती
नामिह दानानां फलं शतगुणं भवेदिति ॥ अथ पुण्यदेशा: ॥ मनु: ॥ दृषद्वतीसरस्व
त्यौर्देवनद्योर्यदन्तरं ॥ तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥ नारद: ॥ पुण्यदेशेषु स
थां वेषु गृहे देवालयादिषु ॥ यत्र संपद्यते दानसंपत्तिस्तत्र दानं समाचरेत् ॥ भविष्यपुराणे ॥
वाराणसी कुरुक्षेत्रं प्रयाग पुष्करं तथा ॥ गोकर्णं नैमिषारण्यं सेतुं श्रीपर्वतं तथा ॥ म

३

हाकालेतथागंगामेतान्पुण्यतमान्विदुः ॥ पाद्मे ॥ लिंगंवाप्रतिमावापिदृश्यतेयत्रकु
त्रचित् तत्सर्वंपुण्यतांयातिदानेषुचमहाफलमिति ॥ प्रतिग्रहनिषेधः ॥ पाद्मे ॥ न
तीर्थेप्रतिगृह्णीयात्प्राणैःकंठगतैरपीति ॥ तीर्थंतीरेक्षेत्रेच ॥ गंगाकृष्णागोदावर्यास्ती
रमाह ॥ विष्णुः ॥ गंगागोदावरीकृष्णातीरमाहुर्महर्षयः उत्तरेनवगव्यूतिर्दक्षिणेयो
जनत्रयमिति ॥ भविष्ये ॥ तीरंगव्यूतिमात्रंतुपरितःक्षेत्रमुच्यतइति ॥ गंगायांतुतीरे
पिनग्राह्यमित्यर्थः प्रवाहमवधिंकृत्वायावद्धस्तचतुष्टयं तत्रनप्रतिगृह्णीयात्प्रा
णैःकंठगतैरपीति प्रवाहेगर्भः ॥ दानधर्मे ॥ भाद्रशुक्लचतुर्दश्यायावदाक्रमतेजलं
तावद्गर्भंविजानीयात्तदूर्ध्वंतीरमुच्यतइति गर्भेप्रतिग्रहनिषेधप्रसिद्धनदीषुगंडक्या

३

दिषुतुतीरेपिनिषेधः॥ तदुक्तं दानधर्मे॥ गंउक्यादिषुतीरेपिनग्राह्यंस्मृतिमिच्छते
तिवचनात्॥ अत्यंतायदितीर्थेपिग्राह्यं॥ अथचेत्प्रतिगृह्णीयाद्ब्राह्मणोवृत्तिकर्षितः॥
दशांशमर्जितंदद्यादेवंधर्मोनहीयतइति पाद्मात्॥ अथदातृकृत्य॥ वाराहे॥ सुस्ना
तःसम्यगाचांतःकृतसंध्यादिकक्रियः॥ कामक्रोधविहीनश्चपारक्यस्पर्शवर्जितः॥
दद्यादितिप्रतोषः॥ कात्यायन॥ कुशोपरिनिविष्टेनतथायज्ञोपवीतिना॥ देयंप्रतिगृ
हीतव्यमन्यथानिष्फलंभवेदिति॥ गौतमः॥ अंतर्जानुकरंकृत्वासकुशंसतिलोदकं॥
फलान्यपिचसंधायप्रदद्याच्छ्रद्धयान्वितः॥ नामगोत्रेसमुच्चार्यप्राङ्मुखोदेवकीर्तना
त्॥ उदङ्मुखायविप्रायदत्वांतेस्वस्तिकीर्तयेत्॥ सदेवताकदायेकीर्तनानंतरंदत्वेत्य

॥ ५ ॥

र्थः ॥ अथ प्रतिग्रहीकृतं कुर्यात्तत्रैव ॥ ॐकारमुच्चरन्प्राज्ञो द्रविणं स्वकुशोदकं ॥ गृ
ह्णीयाद्दक्षिणे हस्ते तदंते स्वस्ति कीर्त्तयेत् ॥ प्रतिग्रहीता सावित्रं सर्वत्रैवानुकीर्त्तयेत् ॥
सावित्रं देवस्य त्वेति ॥ ततस्तु कीर्त्तयेत्सार्धं द्रव्येण द्रव्यदेवतां ॥ समापयेत्ततः पश्चात्का
मस्तुत्या प्रतिग्रहं ॥ यथा श्राकं क इदं कस्मा अदादिति मंत्रं पठित्वेत्यर्थः ॥ आदित्य
पुराणे ॥ प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ॥ मंद्रं पठेतु राजन्यादुपांशु च तथा
विशि ॥ मनसा च तथा शूद्रे स्वस्तिवाचनमेव च ॥ ॐकारं ब्राह्मणे कुर्यान्निरोंकारं म
हीपतौ ॥ उपांशु च तथा वैश्ये मनसा शूद्रजे तथेति ॥ प्रतिग्रहस्तु ब्रह्मतीर्थेन कर्त्तव्यः ॥ ह
स्तमध्ये ब्रह्मतीर्थं दक्षिणाग्रह ॥ रेतैर्निमित्तकोमात् ॥ पुनस्तत्रैव प्रतिग्रहस्य ध

॥ ५ ॥

र्थ्येनजानातिद्विजोविधिं द्रव्यस्तैन्यंसमायुक्तोनरकंप्रतिपद्यतइति तथाविधिंतुधर्म्यं
विज्ञायब्राह्मणास्तुप्रतिग्रहे दात्रासंहतरस्यैवमाहादुर्गाण्यसौध्रुवक्षितियाज्ञवल्क्यो
क्तेष्वा ॥ इति सुवर्णमानं याज्ञवल्क्यः॥ जालस्थसूर्यमारीचिस्थंत्रसरेणुरजःस्मृतं
तेऽष्टौलीक्षास्तुताः स्त्रीस्त्रोराजसर्षपउच्यते गौरस्तुतेत्रयःषट्तेयवोमध्यस्तुतेत्रयः कृ
ष्णलः पंचतेमाषास्तेसुवर्णास्तुषोडश पलंसुवर्णाश्चत्वारःपंचवापरिकीर्तितं द्वेकृष्ण
लेरूप्यमाषोधरणंषोडशैवते शतमानंतुदशभिर्धरणैःपलमेवतु निष्कःसुवर्णा
श्चत्वारिरितिहेमाद्रिः॥ अथधान्यमानं॥ माधवः॥ पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं
चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबु

॥५॥

धैः द्रोणोषोडशभिः खारीविंशत्याकुंभउच्यते कुंभस्तु दशभिर्वाहोधान्यमानं प्रकीर्त्तितमिति ॥ अथ दाने दक्षिणापरिमाणमाह ॥ व्यासः ॥ सुवर्णपरमंदानंसुवर्णं दक्षिणापरा। सर्वेषामेवदानानांसुवर्णंदक्षिणोच्यते अदक्षिणंतुयद्दानंतत्सर्वंनिष्फलंभवेत् परेत्वनुक्तेपुरुषाहारोपयिकतंदुलादिदक्षिणेतिहेमाद्रिः देयद्रव्यतृतीयांशोदक्षिणापरिकल्पयेत् अनुक्तदक्षिणादानेदद्यात्त्रांवापिशक्तितः ॥ भविष्ये ॥ ज्ञेयंनिष्कत्रयंतंपार्थदानेषुविधिरुत्तमः मध्यमस्तुतदर्धेनातदर्धेनाधमःस्मृतः मेषे च कालपुरुषे तुलाधान्येषुमहत्सुच एवंवृक्षेरथेजेच धेनोःकृष्णाजिनस्यच अशक्तस्यापिकुर्योयंपंचसौवर्णिकोविधिरिति ॥ अथाभिषेकमुदाहृत्य पद्मपुराणे ॥ अष्टषष्टिपलो

॥५॥

न्माददद्याद्देदक्षिणांगुरोः होतॄणांचैव सर्वेषांसलवैत्रामुदाहृतं तदर्धंजापकानां
च द्वारपालांस्तदर्धतः एतेनसर्वत्रगुरोरर्द्धमृत्विजांतदर्धंजापकानांतदर्धंद्वारपा
लकानामितिहेमाद्रौदक्षिणाविभागोवगंतव्यः॥ अथद्रव्यदेवतानिरूपणमतिरे॥
अभयंसर्वदैवत्यंभूमेर्वैविष्णुदेवता कन्यादासस्तथादासीप्राजापत्याःप्रकीर्त्तिताः
प्राजापत्यागजाःप्रोक्तास्तुरंगोयमदेवतः तथाचैकशफंसर्वंकथितंयमदेवतं महिषश्च
यथायाम्यंउष्ट्रोवैनैर्ऋतंभवेत् रौद्रीधेनुर्विनिर्दिष्टाछागमाग्नेयमादिशेत् मेषंतुवारु
णंविद्याद्वाराहंवैष्णवंतथा आरण्याःपशवःसर्वाःकथितावायुदेवताः जलाश्रयाणि
सर्वाणिवारिधानीकमंडलुं कुंभचकरकंचैववारुणानिनिबोधत समुद्रजानिरत्नानि र

६ वारुणानिद्विजोत्तमाः आग्नेयंकनकंप्रोक्तंसर्वलोहानिचाप्यथा प्राजापत्यानिसस्या
निपक्वान्नामपिचद्विज ज्ञेयास्तुसर्वगंधाश्चगांधर्वाविविचक्षणेः बर्हिस्पत्यंरस्वर्तवा
सं सौम्याग्नेयारसास्तथा पक्षिणाश्चतथासर्वेवायव्याःपरिकीर्त्तिताः विद्याब्राह्मीवि
निर्दिष्टाविद्योपकरणानिच सारस्वतानिज्ञेयानिपुस्तकादीनिपंडितैः सर्वेषांशिल्प
भांडानांविश्वकर्मातुदेवता द्रुमाणामथपुष्पाणांशाकैर्हरितकैःसह फलानामथस
र्वेषांतथाज्ञेयोवनस्पतिः मत्स्यमांसविनिर्दिष्टंप्राजापत्यंतथैवच छत्रंकृष्णाजिनं
न शय्यांरथमासनमेवच उपानहोतथायानयच्चान्यत्प्राणिवर्जितं सर्वंचांगिरसत्वेनप्रति
गृह्णीतमानसं भुक्तोपयोगियन्सर्वंवाद्विचास्त्रवर्मध्वजादिकं नृपोपकरणंसर्ववि ६

ज्ञेयंसर्वदैवतं ग्रहंतुआर्कैदैवत्संयदनुक्तंद्विजोत्तमः विज्ञेयंविष्णुवत्सर्ववाद्विजस
त्तमाइति प्रतिगृहीतगांपुच्छेकर्णेवाह
स्तिनंकरे मूर्ध्निदासीमज्ञेचैवपृष्ठेश्वतरगर्दभौ अश्वंकर्णेसटायांवा अन्नमुष्टि
त्रयधारयेत् शय्यासनंगृहंक्षेत्रंसंस्पृश्यादायकांचनं उष्ट्रंचककुदस्पृष्ट्वागृगां
श्चमहिषादिकान् गोधामश्वविधानेनपशून्संस्पृश्यपक्षिणः छत्रंदंडेउत्तरुन्मूले
फलंसंगृह्यगौरवात् प्रगृह्योपानहौमंत्रंवासयेत्प्रतिमुच्यवै त
थासमादायकन्याशीर्षयवाकरे कन्यायाःदक्षिणांसमभिमृश्योद्विस्पर्शः इतिभाय
परिपूर्वीप्रतिगृह्णीतचाक्षतां पुत्रमुत्संगमारोप्यप्रतिगृह्णीतदत्तकं रथंरथमुरेवप

७

ष्ट्वाप्रतिगृह्णीतकूबरे कूबरोयुगाधारकाष्टो स्मै
प्रतिग्रहंकुर्याद्भूमिकुर्यात्प्रदक्षिणं करेगृहीत्वाकन्यांतुदासदास्यौद्विजोत्तमाः
आरुह्य चगजास्योक्तः कर्णेच अश्वकीर्तितः तथाचैकशफानांतुसर्वेषांच्चा
विशेषतः प्रतिगृहीताजांशृंगेपुछेकृष्णाजिनेतथा येचैकशफाःशृंगिणःतान श्रा
विशेषतः शृंगेप्रतिगृह्णीयादित्यर्थः कर्णेचपश्वः सर्वग्राह्यापुछेविच
क्षणैः गृह्णीयान्महिषंशृंगेखरंवैदृष्टदेशतः प्रतिगृह्यमहिषादुष्टस्ययाना
नांचाधिरोहणात् बीजानांमुष्टिमादायारत्नान्यादायसर्वतः वस्त्रेदाशांता ८
दादत्वोत्सारिधायापिवापुनः आरुह्योयानहेमुंचमारुह्येवचपादुके धर्म

ध्वजोनुसंस्पृश्यगृह्णीयात् अवनीर्यचसर्वा पित्रलंस्थानानिवेद्विज आयु
धानिसमादायनथामुच्यविश्लषणं आमुच्यवध्येत्यर्थः
अनेनविधिनायेतुतुला
पुरुषमाचरेत् प्रतिलोकाधिपस्थानेप्रतिमन्वंतरंवसेत् विमानेनार्कवर्णेनकिंकि
णीजालमालिना पूज्यमानोप्सरोभिश्चततोविष्णुपुरंव्रजेत् कल्पकोटिशतंयाव
त्तस्मिल्लोकेमहीयते कर्मक्षयादिहपुनर्भुविराजराजोभूपालमौलिमणिरंजितपा
दपीठः श्रद्धान्वितोभवतियज्ञसहस्रयाजीदीप्तप्रतापजितसर्वमहीपलोकः यो
दिपमानमपिपश्यतिभुक्तिमुक्तः कालांतरेस्मरतिचाचयतीहलोके यश्चशृणोति

८ । पठंतींद्रसमानरूपाः प्राप्नोतिधामतेपुरंदरेरेवजुष्टमिति ॥ [illegible] ॥ ए
वंदत्वासुवर्णंतुब्रह्महत्यादिकंचयत् पापंनिहत्यपुरुषःस्वर्गलोकंसगच्छति तच
स्थित्वाचिरंराजन्यदायातिमहीतले राजराजेश्वरःश्रीमा।न्वीतशोकोनिराम
यः रूपसौभाग्यसंपन्नोनित्यंविष्णुपरायणः पुनर्विष्णुपदंयातियत्रगत्वानशोच
तीति ॥ [illegible] ॥ तत्रसुवर्णातुलाया
मेवावश्यकीमतिहेमाद्र्यादयः रत्नरजततुलायांतुलतास्कंतमित्युक्तंतत्रैवाहोमा
द्युक्तैवतुमंडपादिरहितमेवकुर्यात् तत्रमंत्राहोमोवाएवमेवप्रदीयतइतिमात्स्योक्तेः ॥ ८ ॥
ग्रहमंत्रजाप्यमंत्राश्चैनेस्यर्थः ॥ [illegible] ॥ तत्रादौशुभे

द्विशोणार्धिकुंडमंडपमात्रंवाकृत्वासप्तहस्तांपंचहस्तांवात्रितीयांशेनचतु
र्थांशेनवोच्छ्रांवेदींकृत्वातदुपरिपूर्वपश्चिमयोः स्तंभद्वयंनिखेयं
शाकेंगुदाचंदनदेवदारुश्रीपर्णीबिल्वप्रियकांचनोत्थं स्तंभद्वयंहस्तयुग्म
खातंकृत्वादृढंपंचकरोच्छ्रितंतत् तदंतरंहस्तचतुष्टयंस्यादथोत्तरंगचतुरस्र
मेवेति शाकोवृक्षविशेषोमहासारइतिप्रसिद्धः श्रीपर्णीरक्तचंदनतरुः प्रियकः
जीवकः सारमतेकदंबः अंजनः कांचनतुल्यवर्णोवृक्षविशेषः स्तंभद्वयं
चतुरस्रीकृत्यवेदीमध्येपूर्वपश्चिमभागयोर्निखेयं उत्तरांगस्तंभयोरुपरितीर्य
क्काष्ठं तच्चपंचकरंद्वयोस्तंभयोर्हस्तचतुष्टयोपरिनिधेयं चतुरस्रं

॥ १ ॥ समानजातिश्च

तुलावलंब्याहेमेन मध्ये पुरुषेणालंयुक्ता ॥ दैर्घेण सा हस्तचतुष्टयं स्यात्पृथुत्व

दशांगु मस्याश्च नवत्यंगुलं निसुवर्णपट्टाभरणांचकार्या सलोहपट्टद्वयमष्टरवलाभिः यु

तासर्वे पोह्लिचरत्नमाल्याविभूषितामात्यविभूषणाद्या ॥ समानजातिस्तोरण

समानजातिः तुलान्तरांगमध्ये द्वा२ दशांगुले दैर्ध्यस्तादुदगग्रा आवलंब्या पुरुषे

णविष्णुनाष्टरवलाविलंबितयासुवर्णनिर्मितया ॥ तस्मातिमाल्यक्षद्वयोन्यस्तयो

र्वहिस्थिताः तं मंगुलषट्कं विहाय विज्ञेयं ॥ समस्ततुलायामं शोत्तरशतांगुलमिति त्वा

ल पृथुत्वा चास्या दशांगुलं परिमितेन वलयाकृति सूत्रेणासंमितं विधेयमित्यर्थः ॥ ॥ १ ॥

सलोहपात्रद्वयस्रंरवलाभिर्युत्तेतिसुवर्णादिद्रव्य धारणार्थ्यफलकथाचित्पि
लोहपात्रद्वयांवलैविस्रंरवलाभिर्युक्ताकार्यस्पर्धः॥ तंत्रैवब्रह्मपुराणे॥ आ
श्वत्थीरवादिरींवाथिपालाशींवासुवृक्षजां चतुर्हस्तप्रमाणेनसुलक्ष्णांसुदृ
ढांनवां सुवर्त्तुलांसमांतद्वत् स्निग्धांछिद्रत्रयान्वितां मौंजशिक्याद्वयोपे
तांबद्धास्तंभगुयात्प्रिये॥ आहनारदः॥ चतुरस्त्रातुलाकार्यापादोन्वापितथावि
धे॥ चतुर्ष्वपिचपार्श्वेषुमानंस्याच्चतुरंगुलं भुवत्तात्तावतुकरकावंतयोविन्यसे
त्बुधः॥ चतुर्हस्ताथवादितुलामध्येस्रंरवलयान्विता॥ त्रिवक्त्रंहस्ततैत्रयंकुर्यात्कूट
कंचतुरंगुलमिति यदाहतत्रैवविश्वकर्मा॥ निर्योषदानकांथतंतुलादितस्मात्तु

१०

तुलाप्रमाणंसप्तमंगुलानिंदैर्घ्यंत्रिरेषण्णवतिप्रमा
णैः प्रांतद्वयेप्यंगुलषड्कषड्कंत्रातंगुलोष्टोत्तरमंगुलानां स्युर्विंशतिःपंचधातु
बंधेबंधाप्यधिष्टात्सुरान्विंश्याः इंद्राः शचीमारुतरुद्रसूर्यः स्याद्धिम्बक
मंगुरुरंगिरोग्नि प्रजातिर्विष्णुजगद्विश्वैधाताप्रजन्यत्रांशुःपित्रदेवता सो
म्यस्यश्च धर्मामरराजरत्रिमजलेशमित्रावरुणोमरुद्रणाः धनेशगंधर्वजा
लेशाविष्णुरेते श्चतुर्विंशतिरेव देवाः अत्रसौम्याबुधः स्यात्संचविंशःपुरु
षः सएकोयस्ताल्यमानस्कत्वयामहात्मा एताविधेयास्तपनीयमध्यारत्ना
चितादेवतमूर्तयस्ताः षंडगुलस्याच्चतुस्त्रपिंडः प्रांतद्वयेविष्णुरनंतनामा

१०

पात्राद्वयंतच्चतु रंगुलस्यादेवंमयात्तेकथितंप्रमाणं मध्यांत्तटेसंकुलिकांगु
लानिपंचाधिकात्र्यंशत्तिरेव दीर्घ्यं एकांगुलस्याद्ववर्तीहपिंडस्तत्राथिदे
वः किलवासुकीस्यात् एकैकरज्जुलीसतंगुलानिचिः सप्ततिः पिंडगतांगुला
च तच्चैवलकंद्वद्वमथांगुलानिचिंशतथापंचदशाधिकंस्यात् तद्धातुपीठं
शुभकाष्ठपीठंपीठंतथाद्वंद्वमथोविधेयं अधोद्वयेपरम्याधिदेवतास्यात्तुलां
तरेपरमिपतिर्विशेत्रया इति
अथवेधाधोउच्चारचक्रलिखनप्रकाउक्तोमदनरत्ने तत्रत्वायेविधामध्येवि

हस्तंचतुरस्रंप्रसाध्यंप्रागपरदक्षिणोत्तरनवरेखाभिस्तच्चतुःषष्टिकोष्टिकांकु
र्यात् तत्रकोष्टानिप्रत्येकंनचन्वांगुलानिसंपद्यन्ते तत्रबहिरेखपंक्तिषुण
र्वयोस्तत्त्रयंत्रयंत्यवहा प्रतिदिशंमध्यकोष्टद्वयंद्वयंमार्जयेत् तेनचतुर्दिक्षु
षट्षट्कोष्ठानिचत्वारिद्वाराणिसिध्यंति ततोमध्यंस्थितषोडशकोष्टानिमा
र्जयेत् ततोषास्थेएकैकंकोणकोष्ठंविहायकोणकोष्ठद्वारपीठांतरालवर्त्तिन्
वशिष्ठानिपंचपंचकोष्ठानिमार्जयेत् तथाचमध्यपीठपादाः सिध्यंति त
तोमध्याच्चत्वारिवृत्तानिकुर्यात् तत्राद्यचत्वार्यंगुलानिव्यासः द्वितीयेष्टौ
तृतीयेचतुर्विंशति चतुर्थे षड्विंशतिरिति तच्चतुरंगुलंवृत्तंकर्णिकारूपंपीते

नपूरयित्वा कर्णिकावधिरेखां सितेन रजसा निर्मयित्त द्बहिर ष्टांगुलात्मके वृत्ते
पीतरक्तसितरजोभिः संपादित ष्टत्सम ध्याग्राणि षोडश केसराणि संपाद्यत
त्केसरावधिरेखां सितेनैव रजसांगुलोन्नतां संपाद्य चतुर्विंशांगुलात्मकेन द्बहिव
त्तै सितेन रजसा अष्टदिक्ष्वष्टौ पत्राणि रक्ताग्राणि कुर्यात् ततो दलांतरेरखां सि
तेन रजसा विधाय दलांतराणि कृष्णेन रजसा पूरयित्वा तद्बहिरेकांगुलांतराव
हिर्वृत्तरेखां सितेन रजसा संपाद्य वृत्तद्वयांतं परितोऽष्टदलाग्रतन्मध्ये चिन्हैः षो
डशधा विभज्य प्रतिमार्गयित्वा करान् षोडशारान् श्यामपीतारुणश्वेतरजोभिः कल्प
यित्वा तदंतराय घायोगं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्यामरहिताः पंच

रेखाभिरेव तत् तद्बहिः पीठक्षेत्रं चतुरस्रं यथाशोभासं रजोभिरलंकृत्य पीठावधि रे
खां सितेन रजसा चतुरस्रां रचयेत् द्वारक्षत्राणि पूर्वादितः पीतश्यामसितरज
तरहितरजोभिः पूरयेत् आग्नेयात्तु दिक्कोणकोष्ठचतुष्टयं लोहितहरितश्याम
धवलैः पूरयेत् आग्नेयादिपीठादिचतुष्टयं पंचकोष्ठात्मकं तु क्रमात् सितरक्तपी
तकृष्णरजोभिः पूरयेत् ततः सितेन रजसांगुलोन्नतेन बहिश्चतुरस्रे रेखां कुर्यादि
ति मदनरत्नादयः ठक्कुरमते तु चतुरस्रं चतुर्हस्तं तत्र प्रत्येकं द्वादशांगुलानि नवको
ष्ठानि वृत्तानि तु पंच तत्राद्यवृत्ते चत्वार्यंगुलानि व्यासः द्वितीय अष्टौ तृतीयाविं
शतिः पंचमे तच्चतुरस्रं बहिस्तमेष्टत्रिंशादिति पंचकोष्ठात्मकं पीठयोर्दचतुष्टयं

१२

आग्नेयादिक्रमेणरक्तहरितश्यामकृष्णैः पूरणीयं कोणकोष्ठचतुष्टयंप्रत्येकं
त्रिभिःस्त्रिभिर्वर्णैरितिविशेषः॥
पुनस्तेनैव वज्रंप्रागुत्तरभागेआग्नेयांशक्तिमुज्वलां आलिखेद्दक्षिणेद
ण्डंनैरृत्यांखड्गमालिखेत् पाशंतुवारुणेलिख्यं ध्वजंवैवायुगोचरे कौबेर्यां
तुगदांलिख्यईशान्यांशूलमालिखेत् शूलस्यवामदेशेतुचक्रंपद्मंचदक्षिणे
ततोमहानेधुपरिपंचवर्णफलपुष्पायशोभितं वितानंकुंडमंडपेबध्नीयात्॥
प्रथमातुध्वजस्योक्तातेजोवृद्धिकारीशुभा मधुकेनरक्षिकेनतु

॥१३॥ सौभाग्यंतोलेनबहुलाप्रजाः वस्त्रेणादित्यवस्त्राणिप्राप्नोतितुलयाध्रुवं लवणे
नतुलावण्यमरोगित्वंगुडेनच असपत्नीशर्करयासुरूपंचंदनेनतु अवियोगो
स्त्रवंद्भर्तातुलयाकुंकुमस्यच नसंतापोस्तिदेहेवैक्षीरस्यतुलयातथा सर्वकाम
प्रदाःसर्वाः सर्वपापक्षयंकराः यःकरोतितुलाःसर्वाः सगौर्यालयमाप्नुयात्॥
मंत्रेणदद्याभिमंत्रितांनुसुकृतुलामेकनमाद्विजेभ्यः सयातिगौर्याःसदनेसुपुण्यं
नरोलोकदौर्भाग्यमुपाश्नुतेपुमान् तंनुलेसर्वभूतानिामित्यादि० उत्यारस्व गो
दोहनंतत्रासिसीद्धितंर्यित्वाहरिप्रियं अवरुह्यततोदद्यादर्घपादमथापिवा गुरुंसं
पूज्यविधिवद्वस्त्रालंकारभूषणैः विसर्जयेन्नमस्कृत्यभोजयेद्विजपुंगवान् शेषं ॥१३॥

द्विजेभ्योदातव्यंस्त्रीभ्योन्येभ्यस्तथैवच । कदलीदलसंस्थांचपंचपिंडान्द्विमाद्वि
जां कर्पूररसतुलांपूज्यकुंकुमेनाक्षतैस्तु । तंविधिनानेनयोदद्यात्तुलादानंविमत्स
रः सलोकमेतिपार्वत्याः सेव्यमानोप्सरोगणैः । तत्रापिकालंसुचिरमिहलोकेन्दपो
संवेति । आत्मतुल्यंसुवर्णवारजतंरत्नमेववा । योददातिद्विजातिभ्यस्तस्याप्येतत्फ
लंभवेत् । ब्रह्महत्यादिपापौघैर्मुक्तः शिवपुरंव्रजेत् । सप्तसा
पनिर्मुक्तः प्रोक्तेविष्णुपुरंव्रजेत् । तुलापुरुषमस्मीच्चदीयमानेचयेनराः । पश्यंतिते
पियांतिद्यायेचस्युरनुमोदकाः । गुडंवायदिवारंवडंलवणंवापितोलितं । योदद्या
दात्मनातुल्यंनारीवापुरुषोपिवा । पुमान्ग्युम्नवस्यात्तुनारीस्यात्पार्वतीसमा । सुभ

॥१४॥ गौरूपसंपन्नौ भुंजीतांते त्रिविष्टपं हिरण्यदक्षिणायुक्तं सवस्त्रं भूषणान्विते अ
लंकृत्वा द्विजाग्र्यं तं परिधाप्य च वाससि एवं आदित्ये तोलितं पश्चाद्गुरवे प्रतिपादयेत्
सर्वकामसमृद्धात्मानं तत्कालेन वसेद्दिवि इति

निरासार्थं द्रव्यविशेषणां तुलादानान्युक्तानि गारुडे तुलापुरु
षदानं तु भट्टणुम्ट्टस्कं जयोद्भवं अथ लोह प्रदातव्यं सर्वरोगोपशांतये कांसे
चयक्ष्मणोदेयं त्रपुराज्ञी विकारके अपस्मारे तु सीसं स्यात् ताम्रं कुष्ठे च दारुणे पि
त्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः सुवर्णं सर्वरोगेषु प्रदद्यान्मस्तकनाशने प
लोद्भवं तथा नद्याः क्षालिप्यां दीर्घवारुणे गो उपस्मारे रोगे च पौगस्याद्रुउमालके ॥ ॥१४॥

काष्ठजं चाग्निमांद्ये स्याद्रोगोत्पत्तौ च पैष्टयाके मधुद्भवं तथा
देयं कासश्वासजलोदरे घृतोद्भवं तथा देयं छर्दिरोगोपशांतये क्षीरं पित्तवि
नाशाय दधिस्याद्भगंदरे लवणं लेपनाशाय पेष्टं दद्रुविनाशने धान्यं रो
च सर्वरोगस्य नाशनं मुनिभिः स्मृत इति अन्नाद्येसंप्रदानो घृते रूप्य तु
लायां तु सुवर्णतुलाफलमेव पित्तलसिः प्रदरमेहनाशाश्च तुलायां तु तुल्यायां
स्वर्णपस्वमेव ताम्रेण कुष्ठनाशः पित्तलेन रक्तपित्तनाशः कांस्येन यक्ष्मनाशः
त्रपुणा रिष्टनाशः सीसेनापस्मारनाशः लोहेन सर्वरोगविनाशः घृतेन तेजो
वृद्धिश्छर्दिनाशश्च गुडेनारोगित्वं सौभाग्यवृद्धिश्च लवणेन लावण्यं सौभा

॥२५॥ ग्यवृद्धिश्च मधुनासौभाग्यंकासस्वासजलोदरनाशाश्च तैलेनप्रजावान्भवति
क्षीरेणपित्तनाशः संतापनिवृत्तिश्च दध्नाभगंदरनाशः शार्करयासापत्न्यव
धानिवृत्तिः अन्नेनारोगित्वं पिष्टेनदद्रुनाशः फलैः संग्रहिणीनाशः क्रमुके
र्गंडमालानाशः कुंकुमेनसौभाग्यवृद्धिः तैलेनपापनाशः पुष्पैर्बहुरोगनाशः॥
तांबूलेनमुखदुर्गंधिनाशः चंदनेनसौंदर्यवान् गंधेनसौभाग्यं वस्त्रेणादि
व्यवस्त्रावाप्तिः काष्ठैरग्निमांद्यनाशः विष्णुप्रीतिर्वासर्वद्रव्यैरपीति ॥ इति
अथदेवंतुलाहिवैमहाभैरवउच्यते कांस्येत्रपावाभ्यंनोच्चवायुश्च ॥२५॥

सीसकेस्मृतः ताम्रेसूर्यस्तथाप्रोक्तः पैत्तलेचकुहूतथा। रौप्यंचपितरोज्ञेयाः
सौवर्णेसर्वदेवताः फलेसोमेगुडेचापत्तांबूलेचविनायकः गंधर्वाः कुंकुमे
चैवजांगलेग्निस्तथास्मृतः जांगलेकाष्ठेमेथीचक्ष्माप्रयत्नेन ध्वतेमत्यंजय
स्तथा। क्षीरेतारागणाःसर्वेदधिसर्पाःप्रकीर्त्तिताः लवणेपार्वतीदेवीसमुद्दिष्टा
धिदैवतं पिष्टेप्रजापतिर्देवो अन्नेसर्वाश्चदेवताः आर्त्तिर्यदास्यात्तात्रेवा प्रामु
यात्सुपयदेत्राजं नित्यम्मृत्युंजयप्रासिर्विधिनायत्प्रदीयते तदेवसर्वद्रव्याणांसर्वथैव
वतीतिनसंशयः तुलापुरुषदानेनमृत्युंजयतिमानवाः आगमोक्तमृत्युंजय
मंत्रेणपूजयित्वेत्यर्थः नाममंत्रेणावायथाधिकारंयोज्यं॥ इतिद्रव्याधिदेवताः॥

॥१६॥ दानोद्योतेविश्वामित्रः॥ आदित्येराहुणाग्रस्तेसुवर्णेतोल
येत्तुलां सोमग्रहेतुरौप्येणायद्वादानंतुधाश्रृणु प्रवर्ग्येस्यमुखेजाताउत्सन्नेपु
त्रदेहतः सर्वपापहरायेतद्दीयतांप्रीतयेविधुः उत्सृज्यार्घ्यंजलंत्वप्सुनिक्षिपेद्द्वि
जसत्तमेति॥ अथतुलापुरुषदानविधिः। हेमाद्रौविष्णुधर्मोत्तरे॥ तुलादानंप्र
वक्ष्यामिसर्वपापप्रनाशनं यद्दत्त्वाचरितंपूर्वंलक्ष्मीनारायणेनतु पुण्यंदि
नमथासाद्यतृतीयायांविशेषतः गोमयेनानुलिप्तायांभूमौकुर्याद्दृढंशुभं दा
रवंशुभसंश्लिष्टस्यचतुर्हस्तप्रमाणतः सुवर्णंतत्रबध्नीयात्स्वशक्त्याघटितंघटे हेमं
वर्णेस्थापयेत्तत्रवासुदेवंचतुर्भुजं शिक्यद्वयंचबध्नीयात्स्थापयेत्पीठकेशुभे ॥१६॥

32

तत्रारोहेत्सवस्त्रास्यः सर्वालंकारभूषितः अभीष्टदेवतां गर्त्सुस्थापयित्वा
घृतादिभिः तुलापुरुषदानस्य विधिरेषः प्रकीर्तितः अत्र विधिरेष उदाहृतइ
तिप्रकीर्तितइतिवचनादेतावदेवकर्त्तव्यतेस्फुटं न भवति ॥ अतिदीर्घमादरः ॥ नान्य
दिति तुलादानमधिकृत्य लिंगपुराणे दक्षिणां चक्रातं सार्धं वापि दापयेत् गु
रोरिति शेषः ऋत्विजां चैव सर्वेषां द्रव्याणि षून् प्रदापयेदिति तथा यजमानो
ऽयग्रहसंक्रमादिपुण्यकालमासाद्य पूर्वेद्युरेकभक्तादिाचरितप्रायश्चित्तः
त्तः कृतनित्यक्रियो दर्भेष्वासीनो दर्भान् धारयमाणः शुचिराचम्य देशकालौ
संकीर्त्य मम अमुककाम द्वारा श्रीपरमेश्वरप्रीत्यर्थं अमुकद्रव्यैस्तुलापुरुषदानमहं करि
ष्ये

१८

ष्येइतिसंकल्प्य तथारोगनिरासार्थंतुममामुकरोगनिरासेममास्यच्छि॰छ्रोतावी
मुकरोगनिरासेनाक्षिप्रारोग्यत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थमिति तथादा
तुशिष्टाचारवशात्तास्मादितुल्यास्यअष्टमांशंवासुवर्णरजितादितुल्याविशे
षफलप्राप्तिःद्वारारस्कन्देरवःकार्यः तदंगतयागणपतिपूजनंपुण्याहवाचन
माचार्यवरणामंगदेवतापूजनंचकरिष्येइतिसंकल्प्यगणेशांसंपूज्यपुण्याह
स्वस्तिमृद्धिंश्रीः कल्याणमिति ब्रह्मयंचात्मकंबोधायनोक्तंब्राह्मणांपि चत्वारिवा
चयित्वा आचार्यवृत्वाचार्यस्तकलायांगौरीतिकृशादितुल्यांगदेवताश्चपूजयित्वारो
गनिरोगनिरासार्थंतुमहामृत्युंजयमंत्रेणप्रतिमायांमृत्युंजयंतास्मादितोल

१८

नीयद्रव्याधिदेवताश्च पूजयेदिति ॥ इति तुलापुरुषदानविधिनिरूपणं ॥ अथात्र
तुलापुरुषदानप्रयोगः ॥ यजमानः ॥ शुचिराचम्य प्राणानायम्य देशकालौ सं
कीर्त्य एकैकमन्वंतरकालावच्छिन्नप्रतिलोकपालस्थाननिवासपर्वाकार्कव
र्णकिंकिणीजालमालीविमानकरणाप्सरःपूजासहिताशिवपुरगमनपूर्वक
कल्पकोटिशतावच्छिन्नविष्णुपुराधिकरणकनिवासैककामः सुवर्णरत्नरौप्या
दितुलापुरुषमहादानमहं करिष्ये इति यद्वा ब्रह्महत्यादिसकलपापक्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं सुवर्णरौप्यतुलापुरुषमहादानमहं करिष्ये तत्रादौ गणपति
पूजनं पुण्याहवाचनं मातृकापूजनं नांदिश्राद्धाचार्यवरणादि कुर्यात् तान्त्रादितु

॥१८॥ त्वा यां तु संकल्पोत्तरं गणपतिपूजनं पूर्वोक्तपुण्याहवाचनं मात्रं कृत्वा आचार्यं व
त्वा यथाविभवं वस्त्रालंकारादिभिः पूजयेत्॥ ततआचार्यो गोमयोपलिप्तवेद्यां
दौ सर्षपविकरणं पंचगव्यप्रोक्षणं कृत्वा वेद्यां वारुणामंडलं विलिख्य उपरि कुंकुमं
उपेपंचवर्णवितानं फलपुष्पाद्युपशोभितं स ध्वजं बध्वा वेद्यां द्वादशमामाबध्वा
तत्र दक्षिणोदिक् स्त्रिाक्ष्यां तुलां बध्नीयात्॥ गौरीप्रीत्यर्थं तुलायां कर्त्तरहस्त पंच
पिंउकाररूपां गौरीं कुंकुमेनानुलिप्य पूजयेत्॥ ततो धर्मराजसूर्यप्रतिमास्त्रिस्त्रो
माषमाषमात्रसुवर्णनिर्मिता अग्न्युत्तारणादि पूर्वकं संपूज्य उक्तदेवतां च पंचामृते
नाभिषिंच्याभ्यर्च्य विष्णुप्रतिमां तुलामध्ये बध्वा॥ ततः पूर्वोक्ततोलनीयद्रव्या ॥१८॥

धि देवतां द्रव्यो संपूज्य तुलायै नमः इति तुलां च तुलां प्रांत कुटयोर्विष्णुरनंतरंम
ध्यं केदेवासुकि फलक द्वयेषु मिंचसंपूज्य रक्तवस्त्रेण तुलां संवेष्ट्यात्ततः त्रा
तौ सत्यां तुलादंडे सुवर्ण निर्मितासु चतुर्विंशति प्रतिमासु दस्सां स्थं देवता आ
वाह्य पूजयेत् तदित्थं ईशानमावाहयामि १ एवं
सर्वत्र ॐ शशिनेनमः ॐ शशिनमा० २ ॐ मारुताय० ॐ मारुतमा० ३
ॐ रुद्रायनमः ॐ रुद्रमा० ४ ॐ सूर्याय० सूर्यमा० ५ ॐ विश्वकर्मणे० वि
श्वकर्माणमा० ६ ॐ गुरवे० गुरुमावा० ७ ॐ अंगिरोग्निभ्यो० ॐ अगि
रोग्निवा० ८ ॐ प्रजापतये० ॐ प्रजापतिमा० ९ ॐ विश्वेभ्यो देवेभ्यो०

॥ १९ ॥ विश्वान्दे० १० ॐ धात्रेनमः॥ धात्तारमा० ११ ॐ पर्जन्यश्चांपस्त्रभ्यां० पर्जन्यश्च
स्त्रआ० १२ ॐ पितृभ्यो० पितृना० १३ ॐ सौम्याय० सोम्यमा० १४ ॐ धर्मा
य० धर्ममा० १५ ॐ अमरराजाय० अमरराजना० १६ ॐ अश्विभ्यांनमः अ
श्विनौमा० १७ ॐ जलेश्वराय० जलेश्वरामा० १८ ॐ मित्रावरुणाभ्यां० मित्राव
रुणौआ० १९ ॐ मरुद्गणेभ्यो० मरुद्गणमा० २० ॐ धनेश्वराय० धनेश्वरामा०
२१ ॐ गंधर्वाय० गंधर्वमा० २२ ॐ जलेश्वरायनमः जलेश्वरामा० २३ ॐ विष्णु ॥ १९ ॥
वे० विष्णुमा० २४

नमस्ते देव देवानां शक्तिस्त्वं सत्यमाश्रिता । साक्षीभूता जगद्धात्री निर्मि
ता विश्वयोनिना ॥ एकतः सर्वसत्यानि तथानृतशतानि च । धर्माधर्मकृतां मध्ये
स्थापितासि जगद्धिते ॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता । मां तोलयन्ती संसा
रादुद्धरस्व नमोस्तु ते ॥ योसौ तत्त्वाधिपो देवः पुरुषः पंचविंशकः । स एकोधिष्ठितो दे
वि त्वयि तस्मान्नमो नमः ॥ नमो नमस्ते गोविंद तुलापुरुषसंज्ञक । त्वं हरे तारयस्वा
स्मानस्मात्संसारसागरात् ॥ इति पठित्वा ॥ तुलां परिपूज्यांजलिं क्षिपेत् । पुनस्तु
लां त्रिः प्रदक्षिणीकृत्य वामहस्ते धर्मराजं दक्षिणे सूर्यं चांके स्वाभिष्टदेवतां पंचाम
ताभिषिक्तार्चितां चादाय प्राङ्मुखस्तुलायामुत्तरफलके आरुहेत् । दक्षिणेन सु

॥ २० ॥

वर्षास्यादुत्तरेणनराधिपरतिमत्स्यवचनात् नराधिपउरस्यपलक्षणं ततआचार्यंद
क्षिणाफलंकेतोलनीयद्रव्यमारोपयेत्सुवर्णाद्यावत्समाधिकंस्यात्बुद्धिक्रमेणप्र
मिष्टमधिकंकार्यंततोयजमानस्तत्राममध्येदउस्थितस्यहरेत् दृष्याश्रमुखपत्रय
मंत्रैपठेत् ॐ नमस्तेसर्वभूतानांसाक्षिभूतेसनातनी पितामहेनदेवित्वंनिर्मिता
परमेष्ठिना त्वयाधृतंजगत्सर्वंसहस्थावरजंगमं सर्वभूतात्मभूतस्थेनमस्ते
सर्वधारणीति गोदोहकालेतत्रस्थीत्वातंस्मभलामवतीर्यतोलितद्रव्यतुलसी
पत्रंनिधायदेशकालौसंकीर्त्यअमुकगोत्रइहममअमुकमात्मसमतोलितमा
चार्यघन्येभ्योसमाश्रीतवधुवर्गेभ्योदीनअनाथेभ्योदातुमहंसुवर्णमाग्नदे

त

॥ २० ॥

वत्तं दक्षिणात्वेन तुभ्यमहं संप्रददे न मम इति दद्यात् पुनः तुलापुरुषदानकर्मणः कृत्या दि सांगतासिध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति परयसीं दक्षिणां दा तुमहमुत्सृज्य तथा कृत तस्यामुकतुलापुरुषकर्मणः सांगता। यथाशक्ति ब्राह्म णान् यथाकालोपपन्नोनाहं संभोजयिष्ये इति संकल्प्य। तत आचार्यस्त्वावाहितदेव ताः सर्वा आवाहनपूर्वकं विसृज्य आचार्याय तुलाद्वै पादं वा प्रतिमा वस्त्राभरणा दि सर्वं तुभ्यमहं संप्रददे न मम इति दत्वा सदस्यायतदर्थं दत्वा तुला त्रोषं च सदाएवय थोद्दिष्टं दत्वा प्रमादात् कुर्वतां क। यस्य सर्वेति निज पिता कर्म ईश्वरार्पणं कृत्वा सुसंभूतो भुंजीतेति केचित्तु च तुलापूजोत्तरमग्निसंस्थाप्य ईशानादितुला स्थदेवताभ्यः स्वाहावाज्याहुतिर्यश्वर्वाहुतयश्चे छंतीति तुलाप्रतिग्रहप्रायश्चि

41

॥२९॥ त्तेषु हेमाद्रौ मात्स्ये ॥ नचिरं धारयेद्गेहे सुवर्णं तोलितं बुधः निष्कृद्धयावहं स्मात्तस्मा
छीककरंन्दणां शीघ्रं परस्वीकरणाच्छ्रयः प्राप्नोति पुष्कलामिति सुवर्णादिसर्वतु
लास्वेतत् कैमुतिकन्यायात् अत्रत्यैः सुवर्णशब्दो राजतादिसर्वद्रव्यतुलोपल
क्षको बोध्यः मीमांसैकधुरंधरं स्फाति धरोन्यायेपिवागीश्वरः साहित्यामृतसाग
७ रः सुजनतावल्लीरसाङ्कुमः यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाका
रि घृतादितोलनविधौ सत्प्रीतये पद्धतिः ॥ ७ ॥ इति श्री दानाधीत दानरत्नदा
नमयूखाद्यनुसारेण त्ववालोपनामक [illegible] दानसंक्षेपचंद्रिका ॥२९॥
यां तोलि घृतादितुलापुरुषदानप्रयोगः समाप्तः ॥ ७ ॥ अथ गोसहस्रमहा

गोसहस्रदानं चिकीर्षुरधिवासनादिनात्प्रा
क्त्रिरात्रमेकरात्रं वा यथाशक्ति ततः पयोव्रतोऽधिवासनदिने शुचिर्यजमानो देशका
लौ संकीर्त्य मम समस्तपापक्षयोत्तरसिद्धचारणासेवितार्कवर्णकिंकिणीजालमा
लीविमानारोहणोत्तरनेकमन्वंतरावच्छिन्नेंद्रादिसकललोकाधिकरणपुत्रपौ
त्रसमन्वितशिवालयगमनैकोत्तरसंख्यापितृमातामहकुलतारणकाव्यवच्छिन्नात
वच्छिन्नशिवपुरनिवासनांतरराजराजीसवानाश्वमेधशतकर्तृत्वशिवध्यानप
रत्वविष्णुसाहचर्यापन्नयोगरच्छानकसंसारमोचनकामश्च गोसहस्रमहादानंप्र
तिपादयिष्ये इति संकल्पयेत्

॥२२॥

अथाचार्य एकं लक्षणं नंदिकेश्वरं सुंवसवत्सदत्तोत्तरगोसहस्रात्सवत्स
धेनुदत्ताकंच स्वर्णघंटास्वर्णतिलकस्वर्णपट्टकौशायवस्त्रमाल्यहेमरत्नयुतशृंगरौ
प्यारवुराचामरोपशोभितंसनाम्नदोहनपादुकोपानछत्राद्यनेकोपस्कारयुतंवेदी
परितस्थापयेत् मंडपाद्बहिःस्वयथावकाशंगोसहस्रंवस्त्रमाल्यस्वर्णशृंगरौप्य
रवुराघंलकृत्साऽधिदेवासयेत् अथासादितवत्सगोदत्ताकमध्यचत्रोपरिस्था
पितलवणाद्रोणापरिपूर्वोक्तलक्षणंकौशायसंवीतंनानाभरणभूषितंमाल्येक्षफ
लसंयुक्तंनंदिकेश्वरंस्थापयेत् वेद्यपरिफलपुष्पादिशोभितंपंचवर्णविमानंकू

॥२२॥

डेवध्नीयात् ततआचार्यादयः स्वस्वकुंडसन्निधौसर्वौषध्यादियुतंकलशाचतुष्ट

यस्थापनादियजमानाभिषेकांतंतुलामहादानवत्कुर्युः ततः शुक्लमाल्यांबरधरः
सकुसुमांजलिनासवत्सयुग्मेदद्याकलमामंत्रयेत् नमोवोविश्वमूर्त्तिभ्यो
विश्वमातृभ्यएवच लोकाधिवासिनीभ्यश्चरोहिणीभ्योनमोनमः गवामंगेषु
तिष्ठंतिभुवनान्येकविंशतिः ब्रह्मादयस्तथादेवारोहिण्याःपांतुमातरः गवोमेचा
ग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयसंतुगवांमध्येवसाम्यहं यस्मात्वंवृषरू
पेणधर्मएवसनातनः अष्टमूर्त्तेरधिष्ठानमतःपाहिसदामंमेतिपुष्पांजलिनासंप्र
वेदीपश्चिमेप्राङ्मुखउपविश्यपूर्वंवदद्यात्कालोस्मत्वाममसमस्तपापक्षयादिसंसा
रमोचनकामइत्यंतेइदंवृषंइमाःसवत्सधेनुदद्याकसहिताःसहस्त्रगोःसांगोपांगाः॥

45

॥ २३ ॥ अमुकामुकगोत्राअमुकवेदाध्यापकाऽमुकशर्मभ्योगुरवऋत्विगादिभ्योऽहंसंप्रददे
नममेति गुर्वादिहस्तेषुजलंदद्यात् तेचदेवस्यत्वेतियजुषारुद्राध्यायगामिरुक्तापु
च्छेषुप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंकइदंकस्माऽदादितिपठेयुः
ततोयजमानःकृतस्यगोसहस्रमहादानकर्मणःसांगतासिद्ध्यर्थंग्रामभूमिवास्त्रा
दिसुवर्णदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिप्रत्येकंतेभ्योदक्षिणादद्यात् ततःकृ
तस्यगोसहस्रमहादानइत्यादिसांगतासिद्ध्यर्थंनानागोत्रेभ्योब्राह्मणेभ्यःयथाश
क्तिभूयसींदक्षिणांदातुमहमुत्सृजेनममेति यथापुनःकृतस्यइत्यादिसंगतासिद्ध्य ॥ २३ ॥
र्थंयथाशक्तिब्राह्मणान्यथाकालंयथोपपन्नेनाहंभोजयिष्यइतिसंकल्पयेत् ॥

पुण्याहवाचनाद्यावाहितदेवताः संपूज्यउत्तिष्ठब्रह्मणस्पतइत्या
दिनाविसृज्यतद्दिनेपयोव्रतमशक्तौयजमानोनक्ताशीब्रह्मचारीभवेत् ततः
प्रमादात्कुर्वतांकर्म० यस्यस्मृत्याचनामोक्त्यातपः क्त्वाकर्मईश्वरार्पणंकुर्यादितिदिति॥

ज्ञातंगावः सवृषभाधेनुपस्कारसंयुताः
दत्वातुब्राह्मणेभ्यस्तुविशुद्धेनांतरात्मना शिवादिसर्वलोकेषुयथेष्टंमोदतेसुतुसः
ले परायंकोऽस्तुचिराचम्यदेशकालौसंकीर्त्यममसंस्तपापक्षयार्थंपूर्वकसिद्धचारण म
सेवितार्कवर्णकिंकिणीजालमालीविमानारोहणोत्तरानेकमन्वंतरावछिन्नेंद्रादि

॥२४॥

सकलल्लोकपालाधिकरणकपुत्रपौत्रसमन्वितशिवादिसर्वलोकनिवासानंतर
मंतेविष्णुसायुज्यावाप्तिकामोवृषाधिकसालंकृतगोशतदानंकरिष्येइतिसंक
ल्प्यगणपतिपूजनसंक्षिप्तपुण्याहवाचनमात्रंकृत्वागोभ्योनमइतिसवृषभा
गाःसंपूज्यब्राह्मणेभ्योनमइतिब्राह्मणांश्चयथाशक्तिवस्त्रालंकारादिभिःसं
पूज्यप्रार्थयेत गावःसुरभयोनित्यंगावोगुग्गुलगंधिकाः गावःप्र
तिष्ठाभूतानांरक्षंतिचवहंतिच हविषामंत्रपूतेनतर्पयंतिपरानपि महर्षीणांच
होतॄणांगावोहोमेप्रतिष्ठिताः सर्वेषामेवभूतानांगावःशरणमुत्तमं गावःपवि
त्रंगावोमंगलमुत्तमं गावःसर्वस्यलोकस्यगावोधन्याःसनातनाः नमोगोभ्यः

॥२५॥

श्रीपतिभ्यः सौरभेयीभ्य एव च नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः घृतक्षी
रप्रदा गावो घृतयोन्यो घृतोद्भवाः घृतनद्यो घृतावर्त्तास्ता संतु सदा मे गृहे
धर्मस्त्वं वृषरूपेण जगदानंदकारक अष्टमूर्तेरधि
ष्ठानमतः पाहि सनातन इति वृषभं प्रार्थयेत् ततः सजलतिलकुशानादाय अद्ये
त्यादि मम समस्तपापक्षयेत्यादि विष्णुसायुज्यावाप्तिकामो वृषोत्सर्गाधिकरणतो गावः धे
नूपस्कारा सहिरण्यदक्षिणायुता रुद्रदेवतास्तन्मूल्यापकल्पित रजतमुद्रा वा ना
नानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे न मम इति तेन भगवान् परमात्मा श्रीप
रमेश्वरः प्रीयतां तत्सद्ब्रह्मार्पणमस्तु तथा कृतस्य वृषगोत्सर्गदानकर्मणः सांगता

॥२५॥ सिध्यर्थं यथाशक्ति ब्राह्मणान्यथाकालं भोजयिष्ये ॥ तथाकृतस्य ॰ नानानामगो
त्रेभ्यो ब्राह्मणेभ्यः यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे ॥ अथवा अद्येत्या
दि सवृषरुद्रदैवता सहिरण्यदक्षिणायुतयथाशक्त्यालंकृतगोशतमूल्योपक
ल्पितरजतमुद्रा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजन ममेति ततो
ब्राह्मणभोजनसंकल्पं कृत्वा भूयसीं दद्यादिति ॥ इति सवृषगोदानप्रयोगः ॥
अथ सवृषगोदानप्रयोगः ॥ लिंगपुराणे ॥ दशगावः सवृषभावृष
सैकादशीस्मृता ॥ दत्वातु ब्राह्मणेभ्यश्च स याति परमां गतिं शिवादि सर्वलोके
षु यथेष्टं मोदते नरः इति पुण्यकाले शुचिराचम्य देशकालौ संकीर्त्य मम समस्त ॥२५॥

पापक्षयपूर्वकंशिवादिसर्वलोकनिवासांते विष्णुसान्निध्यकामो वृषाधिक
दशगोदानमहंकरिष्ये इतिसंकल्प्य गणपतिपूजनमात्रंकृत्वा गोप्यानमइतिस
वृषंगाः संपूज्यब्राह्मणोप्यानमइतियथाशक्तिवस्त्रालंकारादिभिसंपूज्यगाः॥
॥प्रार्थयेदनमंत्र॥ गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुच सुरभ्यःसौरभेयाश्च
सरितःसागरास्तथा गावःपश्याम्यहंनित्यंगावःपश्यंतिमांसदा गावोस्माकंवयं
तासांयतोगावस्ततोवयं गावोममाग्रतोनित्यंगावःपृष्ठतएवच गावोमेसर्वत
श्चैवगवांमध्येवसाम्यहं॥ इतिगाःसंप्रार्थ्यवृषभंप्रार्थयेत॥ धर्मस्त्वंवृषरूपेण
जगदानंदकारक अष्टमूर्तेरधिष्ठानमतःपाहिसनातनेति॥ वृषंप्रार्थयेत॥ ततः

॥ २६ सकुम्भतिलाजालानान्यादायअद्येत्यादि ० ममसमस्तपापक्षयपूर्वकशिवविष्णुसा
८ न्निध्यावाप्तिकामोवृषाधिकदशगाः धेनुपरस्काराः सहिरण्यदक्षिणायुताः रुद्रदेव
तास्तन्मन्त्योकल्पितरजतमुद्रावानानानामगोत्रेभ्योब्राह्मणेभ्यइत्यादि ० ततोब्रा
सो ह्मणभोजनसंकल्पादिकृत्वा श्रेयसींदद्यात् अथाद्यवृषाधिके धेनूपस्कारसहिरण्यद
क्षिणायुतदशगारुद्रदेवतास्तन्मन्त्योपकल्पितरजतमुद्राः नानानामगोत्रेभ्यो-
इत्यादि ० ब्राह्मणभोजनसंकल्पंकृत्वा श्रेयसींदक्षिणादिरितिसंक्षेपः

कनकाश्वतिलानागा

दासीरथमहीगृहाः कन्याचकपिलाधेनुर्महादानानिवैदशेति ॥ २६ ॥

दातासुवर्णस्यत्रातेविप्रेभ्यः श्रद्धयान्वितः ब्रह्मलोकमनु
प्राप्यब्रह्मणासहमोदते गवेनभूमिंलिप्त्वाताजलेन आलिख्यमध्येसिततंदुलैश्च
सरोरुहंकेसरभूषणाढ्यांसंकीर्णिकिंचाष्टदलंविलिख्य तस्मिन्हिरण्यत्रातमान
मात्रंनिधायतस्योपरिसंविचिंत्येति तच्चब्राह्मणंकमलासनस्थंसंपूज्यविप्रंवला
यथाविभवंसंपूज्यवस्त्रालंकारादिभिः संपूज्यदद्यात् देयं
तद्योजयेत्सर्वंततोविप्रंचपूजयेत् तत्तन्मंत्रैः प्रदद्याद्वैसर्वदानेष्वयंविधिरिति
ममसमस्तपापक्षयपूर्वकमेरुदानफलावाप्तयेदेयद्रव्यतृतीयांशद
क्षिणांहिरण्यदक्षिणासहितंइदंसुवर्णंअग्निदेवतंअमुकगोत्रायामुकशर्मणेब्रा

२७

ह्मणायतुभ्यमहंसंप्रददेनममेतिदत्वापठेत् हिरण्यगर्भगर्भस्थंहेमबीजविभा
वसोः अनंतपुण्यफलदामतःशांतिंप्रयछमे
सर्वोपकरणोपेतंयुवानंदोषवर्जितं योऽश्वंददातिवि
प्रायस्वर्गलोकेमहीयतइत्यादि ॥ यावंतिरोमाणिहयेभवंतिहिनराधि
पतावंतोवाजिदालोकान्आप्नुवंति ॥ तीद्पुष्करलानि वाजिदानंसूर्यलोकान्
कौर्मे त्रोतैःपंचपल्लैरौप्यैःसुवर्णालंकृतंक्रमात् सदक्षिणंसवस्त्रंचब्राह्म
णायनिवेदयेत् ब्राह्मणंचत्वावस्त्रालंकरादिभिरभ्यर्च्यदद्यात्
ममसमस्तपापक्षयपूर्वकाश्वरोमसमसंख्याकाब्दसूर्यलोकनिवासा

२७

वासिकामोयमेश्वः सर्वोपस्कर हिरण्यदक्षिणायुतोयमेदेवन: गोत्रायत्शर्मणे
तुभ्यमहंसंप्रददेनममेति दद्यात् ॥ दानमंत्रः ॥ उच्चैः श्रवास्त्वमश्वानांराज्ञां
विजयकारका सुर्सवाहनमस्तुभ्यमतः शांतिंप्रयच्छमे ॥ ६ ॥ इति सामान्यतो
[illegible] ॥ अश्वमेधमखंयस्तुकर्तुंलोकर्तुम
नीश्वरः अश्वदानंतुतेनकर्तव्यंविधिपूर्वकं विधिंतस्यप्रवक्ष्यामिब्राह्मणानि
मंत्रिंपुरा श्वेतमश्वंशुभंतावद्धमकल्याणभूषितं सुवर्णस्तकटकैः शुद्धैः कारिदं
तोपत्रशोभितं वज्रनेत्रंक्षुरैस्ताम्रैः क्षौमपुच्छंसुवाससं शुभ्रेणपट्टकेनेवसे

२८

वृत्तंस्वायुधान्वितं धान्यरत्नोपरिस्थंचवद्धकक्षंसुपट्टकं एवंसुतेजसंस्वाश्वंब्रा
ह्मणायनिवेदयेत् मन्वादियुगाद्यषनि विष्णुवोपरागादिपुण्यकालेदानंका
र्यंब्राह्मणंवस्त्रावस्त्रालंकारादिभिः संपूज्यअश्वंचसंपूज्यवदेत् मार्त्तंडाय
सुवेगायकाश्यपायसुमूर्त्तये जगद्धिताय सूर्यायत्रिवेदायनमोनमः एवस
मुच्चरन्मंत्रंवकर्णेदद्यात्तिलोदकं दानवाक्यंतु अद्येत्यादि गोत्रायशर्मणेब्राह्म
णायइदंश्वेताश्वंसुवर्णतिलकालंकारयुतंललाटग्रैवेयकंपर्वोत्कालंकारयुतंगं
धपुष्पाद्यर्चितं सूर्यदैवतं वासकलब्रह्महत्यादिपापनाशकामोहयरोमसं
ख्याकाब्दसूर्यलोकनिवासकामश्वसालंकृतायुतुभ्यमहंसंप्रददेनममेति

२८

ततोऽश्वप्रार्थना। महार्णवे समुत्पन्न उच्चैःश्रवसपुत्रक मयात्वं विप्रमुख्याय
दत्तोऽहयमुख्वीभव इति ततोप्रार्थना। इमं विप्रमसस्तस्य मश्वं तेप्रतिपादितं प्र
तिगृह्णीष्व विप्रेंद्र मया दत्तं सुशोभनमिति इति दानामंत्रं समुच्चार्य कर्पीसम
र्पणी कृत्वा विप्रहस्ते जलं क्षिपेत् ततः सुवर्णं दक्षिणां दद्यात्। विप्रो देवस्य त्वे
ति गृहीत्वा यथाशाखं कामस्तुति पठित्वा स्वस्तीत्युक्त्वा अश्वमारुह्य गच्छेत् प्रदा
नांसत्य सत्यतिं भास्करं मानसि ध्यात्वा आत्मीयं स्वगृहं व्रजेत्। श्वेतमश्वं तु यो
दद्यात्स तेजःश्वागुणं भवेत् एवं कृते नरव्याघ्र सूर्यलोकं व्रजेन्नर इति इति श्वेताश्व
दानं अथ शिवायाश्वदानं शिवायाश्वमलंकृत्य यः पर्वणि निवेदयेत् सोश्व

२९

मेधस्ययज्ञस्यफलमष्टगुणंलभेदिति शिवधर्मेपिशिवायाश्चदानंमुक्तं।
वैशाख्यांपौर्णमास्यांवातिलान्क्षौद्रेण
संयुतान् यःप्रयच्छेद्द्विजाग्रेभ्यःसर्वपापैःप्रमुच्यते तथाज्येष्ठेमासितिलान्द
द्यात्पूर्णिमायांविशेषतः अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः तथा
माघेमासितिलान्यस्तुब्राह्मणेभ्यःप्रयच्छति सर्वसत्वसमाकीर्णनरकंनस
पश्यति तिलागावोहिरण्यंच अन्नंकन्यावसुधरा दत्ता
नेत्तानिर्विधिवत्तारयंतिमहाद्भयात् तिलस्नायीतिलोद्वर्ती तिलहो

२९

मीतिल्लोदकी तिलाकृतिलदानाचषद्दिलापापनाशनः

अन्यत्रतुदानमेव कृष्णाजिनेतिलान्कृत्वासुवर्णमधु

सर्पिषी द्रोणोकसससाछन्नेत्रिथादद्यात्सदक्षिणं ब्राह्मणायचतंदत्वासं

वैतरतिदुष्कृतमिति अमुकगोत्रायामुकशर्मणेब्राह्मणाय

सुपूजितायकृष्णाजिनस्थंसुवर्णमधुसर्पियुक्तंवस्त्रछन्नंतिलद्रोणंसोमदै

वतंसर्वपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति कृतैतत्तिलद्रोणदानस्य

सांगतासिध्यर्थंइदंसुवर्णमग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेति

दद्यात् प्रतिगृहीतादेवस्यत्वेतिप्रतिगृह्ययथाशास्त्रंकामस्तुतिंपठित्वासमा

३०

पयेत् ताम्रपात्रेतिलैः
पूर्णंप्रस्थमात्रंद्विजायच सहिरण्यंचयोदद्यात्ससहंश्रद्धयान्वितः सर्वपापवि
शुद्धात्माह्लभतेपरमांगतिमिति अद्येत्यादिइदंतिलपूरितताम्रपात्रंसोमदे
वतंससुवर्णंअमुकगोत्रायअमुकशर्मणेब्राह्मणायअशेषपापक्षयार्थंकाम
स्तस्यमहंसंप्रददेनममेति तिलाःस्वर्णायुतास्तस्मात्प्रदत्तास्वधना
न्नाः विष्णुप्रीतिकरानित्यमतःशांतिंप्रयच्छमे प्रतिग्रहःपूर्ववत्
ताम्रपात्रेतिलान्दत्त्वा ३०
त्वापलषोडशकल्पिते ससुवर्णंनित्यात्स्याचाविप्रायप्रतिपादयेत् नानायज्ञ

त्रिविधंपापंवाङ्मनःकायसंभवं तिलपूर्णंताम्रपात्रंसहिरण्यंद्विजायवै
प्रात्रदत्वातुविधिवद्दुःखमंविनिहन्तिसः तिलपात्रंत्रिधाप्रोक्तंकनिष्ठो
त्तममध्यमं ताम्रपात्रेदशपलंजघन्यंपरिकीर्तितं द्विगुणंमध्यमंप्रोक्तं
त्रिगुणंचोत्तमंमतं स्वर्णमेकंजघन्यंतुद्विगुणंमध्यमेक्षिपेत् त्रिगुणंचो
त्तमेप्रोक्तंसुवर्णपरिकीर्त्तितः पलसंख्यातुनिष्कद्वयमिति सपादनि
ष्कद्वयमित्यन्ये अत्रदेशाचारैर्व्यवस्था दानवाक्यंतुनित्यतिलपा
त्रदानवत् यानिकानिचपापानिब्रह्महत्यासमानिच तिलपात्रदानेन
तानिनश्यन्तुमेसदेति इतितिलपात्रदानं अथमातुराण्यत्वातिलपू

(6)

यंकांस्यपात्रदानं आदित्यपुराणे यत्नेसौत्रोमणिंकर्त्तुं यदिशक्तिर्नवि
द्यते महासरस्ताथावापीकूपं कर्त्तुंचदीर्घिकं एवंकृते मातृऋणान्मु
क्तोभवतिमानवः सदक्षिणंकांस्यपात्रं दत्वाचैवप्रमुच्यते शुद्धकांस्य
स्यपात्रस्यप्रमाणंपंचविंशतिः पंचविंशतिपलानितिलानामत्रनिर्दि
ष्टप्रस्थानांसप्तकंतथा सुवर्णमाषाश्चत्वारःपात्रस्योपरिधारयेत् व
स्त्रेणावेष्टयत्पात्रंपिधायचसुपूजितः स्नानंकृत्वानिम्नगायांपितॄन्देवां
श्चतर्पयेत् ततोभिपूजयेद्देवंशंकरंहरिरेववा गोमयेनाथसंलिप्यगृह
मध्यंचसर्वतः लिखेत्समंद्वादशारंकुंकुमेनाथशोभनैः ततोवह्निंसुसं

स्थाप्य होमं कुर्याद्घृतैर्वेस्तिलैः पद्मे पात्रं प्रतिष्ठाप्य पूजयेद्भक्तिभावतः त
तो ब्राह्मणमाहूय बहुतत्र सुसंभृतं पादौ प्रक्षाल्य विधिवन्मातुः श्राद्धं
समाचरेत् अथ कृत्यं यथाशक्ति माध्येवामृतवासरे ग्रहणे रविसोमाभ्यां
संक्रांतिषु युगादिषु तथान्यदपि यद्दत्तं माध्यामुद्दिश्य मातरं तदक्षयफ
लं सर्वं पुरा प्राह महेश्वरः जीवंति भूषयेद्वस्त्रैर्माल्यैरपि विभूषणैः दत्वा
विप्रस्य तत्पात्रं होमं कुर्यात्प्रयत्नतः सोपस्कारं सताम्बूलं समाप्य च विसर्ज
येत् अन्येषामपि विप्राणां भोजनानि प्रदापयेत् अथास्य प्रयोगः माध्यां
पूर्वोक्तपुण्यकाले वा यजमानः कृतनित्यक्रियः पूर्वोक्तद्वादशारपद्मेका

३२

स्यपात्रंतिलैः पूरितंस्थापयित्वाहरंहरिंवासंपूज्यतत्पुरतोग्निंविष्णुमंत्रेण
शिवंवासंपूज्यतत्पुरतोग्निंविष्णुमंत्रेणशिवमंत्रेणशिवंवाअष्टोत्तर
शतंघृताक्ततिलैर्यवैश्च हुत्वाब्राह्मणामाहूयउदङ्मुखमुपविश्यपादप्रक्षा
लनादिमातुःश्राद्धंसमाप्याचम्यप्राणानायम्य अद्येत्यादि॰ गोत्रायशर्म
णेब्राह्मणायउक्तोपस्कारयुतंममममातुः गर्भधारणपोषणमलमूत्रादि
नानादुःखैःशुद्ध्यर्थंचानृण्यत्वकामः इदंपंचविंशतिपलात्मकंकांस्यपात्रं
प्रस्थसप्तकमिततिलैः पूरितंमाषचतुष्टयसुवर्णयुतंवस्त्रसंयुतंसर्वो

३२

पस्कारसंयुतंतुभ्यमहंसंप्रददेनममेतिदद्यात् मंत्रास्तु कांस्यपात्रं

मयादत्तं मातुरानृण्यकाम्यया। भगवन्वचनात्तु स्वयं यथाशक्ति स्तथाव

द दशमासांश्च उदरे जनन्यासं स्थितस्य मे कुक्षिताबाल्यभावेन स्तन

पानाद्धिजोत्तम। मल्लमूत्रादि मद्धेपलिप्सायाचे मयाकृत। भवतोवचना

द्धममपुक्तिस्सवेद्दयात्। तिलसंख्याकृतं दुःखं जनन्या मम सेवितं कां

स्यपात्रप्रदानेन कृतकृत्यो भवाम्यहं ततः शक्त्या हिरण्यदक्षिणां दद्या

त्। पुनर्व्याहृतिभिराज्यहोमं कृत्वा विसर्ज्य यथाशक्त्या ब्राह्मणान्भोज

यित्वा सुहृद्युतोऽश्नीतेति इति मातुरानृण्यत्वतिलपूर्णकांस्यपात्रदा

नप्रयोगः अथ पूर्णतिलकरकदानं बायवीये करकं तिलसंपूर्णं मं३

३३

लेवन्हिंदेवते शिवंवन्हिवदाराध्यंपूजयेत्करवीरकैः पूजातुरक्तचंदने
न निर्यासः सजरधूपेनधूपयेत् वन्हिमंडलंत्रिकोणमंडलंशिवंव
न्हिवदितिविद्धिस्वरूपंशिवंब्रह्माण्डपुराणे आदर्शानंचतनोदधादीया
नांचचतुष्टयं वन्हिरूपपतिःशंभुर्वन्हिरूपीतिलाश्रयः निजरूपकृतंपा
पंनाशुसंचव्यपोहतु इतिदत्तेस्यनश्यंतिपापान्यग्निकृतानिच पापहो
मेषुकाष्ठेषुहिंस्यंतेयानिवह्निना आगारवनदाहादिसंभवानिचयानि
वै विरुद्धकरणोत्थानिरूपयोगोद्भवानिच परदारपरद्रव्यापुत्रदात्री ३३

नजानिच शावादिदर्शनोत्थानिमेत्रदोषकृतानिच यएवंकुरुतेदानं
शिवभक्तपरायतव्रतः शिवलोकेवसेद्भूपः कल्पत्रयमनुत्तमं ः इतितिल
पूर्णकरकदानं ७॥ अथगजदानं कौर्म्ये ॥ दद्याद्गजंपुराणोक्तंमहान्त्यंवं
चरातानिवा वित्तानुसारात्तत्रापिकनिष्ठोत्तममध्यमं शान्तत्रयंहेममाष
दानमध्यममिति रूप्यस्थूणालंकरणांस्वर्णताराविभूषणं सदक्षिणांवि
चरात्त्यादत्वाशिवपुरंव्रजेत् स्थूणारज्जुः नारामौक्तिकजालागजालं
काराः कौर्म्ये यथाशास्त्रोपपन्नेनायःप्रयच्छतिदंतिनं ब्राह्मणायदरि
द्रायस्वर्गलोकेमहीयतइति ततोगजदानांगांशिवंगांजिद्विजंसंपूज्यदद्यात्

॥ ३४ ॥

दानवाक्यंतु अद्येत्यादि० ममसर्वपापक्षयोत्तरसिद्धचारणासेवितार्कवर्णकिंकिणीजालमालाविमानारोहणोत्तरानेकमन्वंतराभावच्छिन्नाक्षय्यदेवराजत्वाविष्णुपुरावाप्तिकामस्तत्प्रीतिकामश्चसालंकृतायामुकगोत्रायामुकशर्मणेब्राह्मणायेमंगजंकक्षारज्जुस्थिरासनसहितंकांचनमालादिकीर्णचामरगंधपुष्पाद्यलंकृतंप्रजापतिदैवतंतुभ्यमहंसंप्रददेनममेतिकरेधृत्वादद्यात् कुरंभुंउदंउः कौतज्जदानकर्मणः सांगतासिद्धार्थंइदंसुवर्णंअग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिदद्यात् ततोद्विजोगजमारुह्यदेवस्येति० यथाज्ञातस्वंकामस्कृतिंपठित्वाप्रतिग्टह्णामि

॥ ३४ ॥

त्वे

स्वस्तीतिपठेत् यजमानोगजंप्रार्थयेदेतैर्मंत्रैः ० ऐरावतश्चतुर्वैर्दंतोगजानां
नायकस्त्वंसः दिग्दंतिनांपूज्यतमःपापंक्षपयतुनःप्रभो सुप्रतीकगजेंद्रस्त्वंसर
स्वत्याभिषेचकः इंद्रस्यवाहनश्रेष्ठःसर्वदेवैश्चपूजित गजेंद्रमत्तमातंगदेयसे
न्यविनाशकः तवदानेनमेशांतिःसर्वदास्तुमहत्सुखमिति ब्राह्मणैस्तथास्तु
इत्युक्तेभूयसींदद्यादिति इतिगजदानप्रयोगः अथदासीदाने वन्हिपुराणे
स्थिरनक्षत्रसंयुक्तेसौम्येसौम्यग्रहान्विते दानकालप्रशंसेतिसंतर्पणीवायु
नः अलंकृत्ययथाशक्त्यावासोभिर्भूषणैस्तथा ब्राह्मणायप्रदातव्यामंत्रे
णानेनशक्तितः पंचवर्षाधिकासातुचत्वारिंशात्समावधि दासीद्विजायदा

69

३५

तथ्यादासीदानेप्ययंविधिरित्यादि दानवाक्यंतु अद्येत्यादि० गोत्रायत्शर्म
णेसालंकृतायसुवर्णालंकारवतींगंधपुष्पाद्यर्चितांप्रजापतिदैवतांअक्षय्य
सुखवासिकामस्तस्यमहंसंप्रददेनममेति त्रिरसि धृत्वादद्यात् द्विजप्रार्थना
मंत्रस्तुवह्निपुराणे इयंदासीमयातुभ्यंधीवत्सप्रतिपादिता सर्वकामकरीसो
म्यायथेष्टंभद्रमस्तुते ततःसुवर्णं दक्षिणांदत्वानमस्कुर्यात् अनुगत्वातु
सीमायां द्विजं चैवविसर्जयेदिति इतिदासीदानं अथरथदानंकौर्मे रथं
चतुर्वल्लीवद्धैरूढधान्यावृतंतथा वित्तानुसारात्सर्वैश्चरथोपकरणैर्युतं सद

३५

क्षिणंचविप्रायदत्वाशिवपुरंव्रजेत् अष्टादशधान्यवृतं रथोपकरणानियुग

यो क्षावस्त्रादीनीदक्षिणाचत्रिंशन्माशभितिसुवर्णमुत्तमा द्विशतेमध्य
मा अधमाशतैकभिति त्रैविध्यमाहहेमाद्रिः दानवाक्यंतु अद्येत्यादि०
गोत्रशर्मणेसालंकृताय चतुर्बलीवर्दैर्युक्तंसोपस्करं धान्यद्रोदशभिर्युतंवि
श्वकर्मदैवतं अक्षय्यस्वर्गलोकेदेवसुखवाप्तिकामस्तुभ्यमहंसंप्रददेनममेति
मंत्रस्तु रथायरथनागायनमस्तेविश्वकर्मणे विश्वरूपायदेवाय अरूपाय
नमोस्तुते सुवर्णदक्षिणांदद्यात् इतिरथदानं अथगंत्रिरथदानंगारुडे
गंत्रीतुरथसंयुक्तायोददातिद्विजायते सर्वकामसमृद्धात्मासराजाजायतेभु
वाति गंत्रीरथविशेषः साचतुर्भिर्गजैरश्वैर्वृषैर्वापताद्वाभ्यांचोपेता दा

71

३६

नवाक्यंतुपूर्ववत् मंत्रस्तु गंत्रीमीमांप्रयच्छामिविप्रकर्मीधिदेवतादाने
नानेनभर्गवान्श्रीयंनामेपरःपुमानिति ततःसुवर्णदक्षिणा इतिगंत्रीसं
ज्ञकरथदानं अथप्रसंगाच्छिविकादानं हेमाद्रौमात्स्ये मार्गशुक्लैकाद
श्यांमाघफाल्गुनयोः वैशाखेवाहिरण्मयंहरिमभ्यर्च्यरात्रौजागरंकृत्वा
प्रातःकृतनित्यक्रियाअद्येत्यादि० गोत्रायशर्मणेसुपूजितायइमांशिबि
कांउक्तोपस्करांअंगिरोदैवतांइष्टभोगावाप्तयेतुभ्यमहंसंप्रददेनममेति
ततःसुवर्णदक्षिणांदद्यात् तत्रैववन्हिपुराणे देवलोकेषुविपुलंभोगानां
तरंमतेविष्णुसायुज्यवाप्तिकामेविप्रस्यवर्षीशानंशिबिकावालकानांच

३६

वर्षपर्याप्तमन्नंचदद्यात् दितिहेमाद्रिः द्विजप्रार्थनामंत्रस्तु शिबिकाते
मयादत्तायथाशक्त्याविभूषिता द्विजत्वंप्रतिगृह्णीष्ववांछितंतेनमेस्तुवे
दिति इतिशिबीकादानं अथमहीदानं कौर्म्ये गोचर्ममात्रंप्रमंडलम
धिकंवास्वशक्तितः त्रिधासदक्षिणांकृत्वाशिवपुरंव्रजेदिति तत्रैकसुवर्ण
दक्षिणोत्सर्गः अपिगोचर्ममात्रेणसम्यक्दत्तेनमानवः धौतपापोविमुक्तात्मा
स्वर्गलोकेमहीयतइति तथा दशहस्तेनदंडेनत्रिंशद्दंडान्निवर्तनं त्रिभा
गहीनंगोचर्ममानमाहप्रजापतिः तथा गवांशतंवृषश्चैकोयत्रतिष्ठत्य
त्रित तद्धिगोचर्ममात्रंतुप्राहुर्वेदविदोजनाः तथाषष्टिर्वर्षसहस्राणिस्वर्गे

॥३७॥ वसतिभूमिदः आछेत्ता चानुमंता च तान्येव नरके वसेत् तथा भूमिंयः प्रति
गृह्णाति भूमिं यश्च प्रयच्छति तावुभौ पुरुषौ लोके सूर्यमंडलभेदिनौ तथा
यथा भूमिप्रदानस्य कलां नार्हति षोडशीं दानान्यन्यानि मेत्रांगतिर्भूमिनामु
द्भवं त्विहेति दानवाक्यं तु आद्येत्यादि० गोत्रायशर्मणे सालंकृताय षष्ठिर्व
र्षसहस्रं स्वर्गलोके शिवपुरनिवकामः सर्वपापक्षयकामो वा इमां भूमिं सशस्या
द्भवां सवृक्षफलपुष्पाद्यं कृतां सुदैवतां तुभ्यमहं संप्रददे न ममेति साक्षातकुश
तिलोदकं द्विजहस्ते दद्यादिति ब्राह्मणस्तु भूमिं प्रदक्षिणीकुर्वन् प्रतिगृह्णी ॥३७॥
यात् देवस्यत्वेति यथा शारवं कामस्तु इति पठित्वा स्वस्तीति वदेत् मंडव्याव

चनादत्तसुवर्णदक्षिणामत्ता मंत्रस्त सर्वेषामाश्रयाभूमिर्वराहेणसमु
धृता अनंतसस्यफलदामतःशांतिप्रयच्छमे तथा अस्यारोहंतिबीजानि
वर्षाकालेमहीयते भूमिप्रदानात्सकलामभसंतुमनोरथाः इतिशिवधर्मे
विश्वामित्रः स्वदत्तांपरदत्तांवायोहरेच्चवसुंधरां षष्टिर्वर्षसहस्राणिविष्ठा
यांजायतेकृमिः सविष्टयांकृमिर्भूत्वापितृभिःसहमज्जतीतिवापाठः इ
तिशिवधर्मोक्तंभूमिदानं अथगृहदानंकौर्म्ये उक्तंतः सर्ववित्तेनपूर्णं
गृहमपिविधा सदक्षिणंद्विजेदत्वाब्रह्मलोकेव्रजेन्नरइति ऐष्टिकं दारुकं
वापिमृण्मयंवापिनिर्मितः सर्वोपकरणोपेतंयोदद्याद्विपुलंगृहं ब्राह्मणा

३८

यदरिद्राय विदुषे च कुटुंबिने सर्वकामसमायुक्तो ब्रह्मसायुज्यमाप्नुयादिति
ब्रह्मवैवर्त्ते नगार्हस्थ्यात्परो धर्मो नैव दानं गृहात्परं नान्नतादधिकं पापं न
पूज्यो ब्राह्मणात्पर इति गृहनिर्माणप्रकारमाह नारदः स्नानागारं दि
शि प्राच्यां आग्नेय्यां पचनालयं याम्यां शयनगेहं च नैऋत्यां शास्त्रमं
दिरं शास्त्रमंदिरं वारुण्यां प्रतीच्यां भोजनागारं वायव्यां पशुमंदिरं
भांडागारं उत्तरस्यां ऐशान्यां देवमंदिरमिति कुर्यादिति शेषः तत्र कू
पे दिग्विशेषफलं देवीपुराणे पूर्वमाश्रित्य कर्तव्यः कूपस्याग्निदिनिर्ऋषिवे।
न पूर्वव्यत्ययं कुर्यान्मयादेवालया गृहादिति कृते भयप्रदे लोके नयाचा।

३८

स्यग्निजंभयं वायव्यांवापिदेवस्य भयदंजायतेकृतमिति वराहमिहिरः॥
पुष्टिंफलतिपुत्रहानिपुरंध्रिनाशंमृत्युंसपदंशास्त्रबाधां किंचसौख्यंदिक्षु
पूर्वादिकुर्यात् कूपामर्थ्येगेहमर्धक्षयंचेत्यादि मात्स्ये देवतापंचकंतत्रच
त्वारिंशत्समाहृतं पूजयित्वायथान्यायंततोदद्याद्गृहंगृही पूजयित्वास्य
यवास्तुशांतिंकृत्वादद्यादित्यर्थः अथप्रसंगात्संक्षेपेणवास्तुशांतिप्रयो
गः कर्त्ताशुभदिने आचम्यप्राणानायम्यदेशकालौसंकीर्त्य अस्यवस्तोः
शुभतासिद्ध्यर्थंवास्तुशांतिंकरिष्ये इतिसंकल्प्यतदंगतयागणेशपूजा
स्वस्तिवाचनमातृकापूजाभ्युदयिकश्राद्धाचार्यब्रह्मर्त्विग्वरणानिकृत्वा

77

॥ ३९ ॥

यथाविभवेनस्वालंकारादिभिः संपूजयेत् तच्च आचार्यायदत्वसंस्थितं
भूतं ० अपक्रामंतुभूतानियेताण्यां ० भूतप्रेतपिशाचाद्याश्चापक्रामंतु
राक्षसः स्थानादस्माद्व्रजंत्वन्यान्स्वाकरोनिभुष्टिमानित्यनेनसर्षपा
न्विकीर्यपंचगव्येनशुचिवीहव्यइत्यचेन ० एतौन्विंद्रमरुत्चेन ० गृहंसं
प्रोक्ष्यगृहमध्येप्राच्यामैशान्यांवाचतुरंगुलंहस्तोच्छ्रितंचतुरस्रंस्थंडि
लंकृत्वातस्येशानादिकोणचतुष्टयेचतुरोलोहकीलान् विशंतुभूतले
नागालोकपालाश्चसर्वदाः अस्मिन्गृहेवतिष्ठंतु आयुर्बलकराःसदे ॥ ३९ ॥
तिमंत्रेणनिखनेत् प्रतिकीलंमंत्रावृत्तिः ततईशानकोणाच्चतुर्षुको

येषु अग्निश्चोप्य यसर्वेभ्योये चान्यतासमाश्रिताः तेभ्येवलिंप्रयच्छामिपु
ण्यमोदनमुत्तममिति मंत्रेणामंत्रावस्यामाषाभक्तबलीन् दत्वाछंडिलोपरिकुं
कुमादिना ० हेमरूप्यशलाकयावाप्राक्पश्चायतःप्रागंताउदक्संस्थाद्व्यं
गुलांतराप्रपावादिनमेतिदशानामपिदशरेखाःकुर्यात् ॐशांतायनमः
१ ॐयज्ञोवत्सेनमः २ ॐकात्यायै ० ३ ॐविशालायै ० ४ ॐप्राणवा
हिन्यै ० ५ ॐसरस्वत्यै ० ६ ॐसुमत्यै ० ७ ॐनंदायै ० ८ ॐसुभद्रायै ० ९
ॐसुरथायै ० १० इतिदशरेखाःकृत्वा ॐहिरण्यायै ० १ ॐसुव्रतायै ० २
ॐलक्ष्म्यै ० ३ ॐविपहत्यै ० ४ ॐविमलायै ० ५ ॐप्रियायै ० ६ ॐविज

॥ २० ॥

यायै० ८ ॐ बालायै० ९ ॐ विशोकायै० ९ ॐ उंडायैनमः १० इति दक्षि
णोत्तरा यताप्राक्संस्थाः दशरेखाः कुर्यात् एवमेकाशीतिपदं मंडलं संपद्य
ते तत्रमध्ये स्थनवकोष्ठानि रेखामार्जनेनैकी कुर्यात् एतंनवपदं ब्रह्मस्था
नं तस्य चतुर्दिक्षु चत्वारि पदानि विदिक्षु स्थंडिलाकाराणि द्वादशकोष्ठाच
तुष्टोषमयतस्त्वाविति विंशत्येकपदानि अवशिष्टानि प्रतिदिशापंचपंचे
ति पदानि तेषु चतुर्ध्यंतैर्नमोंतैर्वक्ष्यमाणनामभिर्देवता आवाह्य स्थापये
त् तत्रेशानकोणएकदेवास्ताः सिरशि ॐ शिखिनमावाहयामि १ तद्दक्षि

॥ २० ॥

णैकपदे दक्षिणनेत्रे ॐ पर्जन्याय० ॐ पर्जन्यमाव० २ तद्दक्षिणपदे नतो

पिपश्चिमतरइतिपदद्वयेदक्षिणश्रोत्रे॥ ॐ जयंताय॰ जयंतमाव॰ ३ तद्दक्षि
णपदद्वयेदक्षिणांसे॰ ॐ कुलिशायुधाय कुलिशायुधमावा॰ ४ तद्दक्षि
पदद्वयेदक्षिणबाहौ ॐ सूर्याय सूर्यायमा॰ ५ तद्दक्षिणपदद्वयेदक्षिण
बाहवे ॐ सत्याय॰ सत्यमावा॰ ६ तद्दक्षिणपदद्वयेदक्षिणकूर्परे ॐ भृशा
य भृशामा॰ ७ तद्दक्षिणे अत्यंपंक्तिगतैकपदेदक्षिणहाहवे ॐ आकाशा
य आकाशमा॰ ८ ॐ आग्नेयकोणपदेदक्षिणबाहवे॰ ॐ वायवे॰ वायु
मा॰ ९ तत्पश्चिमैकपदेदक्षिणमणिबंधे ॐ पुष्णे॰ पूषणमावाह॰ १० तत्प
श्चिमेततोप्युत्तरइतिपदद्वयेदक्षिणपार्श्वे ॐ वितथाय वितथमा॰ ११ तत्प

81

॥४१॥

श्मिमपदद्वयेदक्षिणपार्श्वेऽर्गृहक्षताय० ग्र्हक्षतमा०१२ तस्यश्मिमपदद्वयेदक्षिणोरो ॐ यमाय यममा० १३ तस्यश्मिमपदद्वयेदक्षिणजानौ ॐ वितथाय वितथमा० ॐ गंधर्वायनमः गंधर्वमावा० १४ तस्यश्मिमपदद्वयेदक्षिणजंघायांस्टंगराजाय स्टंगराजमा० १५ तस्यश्मिमेवास्वपंक्तिगतैकपदेदक्षिणस्फिजि ॐ म्रगायम्रगमावा० १६ नैऋत्यकोणपदेपादयोः पितृभ्यो० पितृनावा० १७ तदुत्तरेकपदेवायस्फिजि ॐ दौवारिका०मा० १८ तदुत्तरेततोपिप्रागितिपदद्वयेवामजंघायां ॐ सुग्रीवाय० सुग्रीवमा० १९ तदुत्तरपदद्वयेवामजानौ ॐ पुष्पदंताय पुष्पदंतमावा० २० तदुत्तरप

॥४१॥

दद्दूयेवामोरौ ॐ जलाधिपाय जलाधिपमावा० २१ तदुत्तरपदद्दूयेवामपा
र्श्वे ॐ असुराय असुरमावा० २२ तदुत्तरपदद्वयेवामपार्श्वेएव ॐ अशोषा
य० अशोषमा० २३ तदुत्तरेपदद्वयेबाह्यपंक्तिगतेकपदेवाममणिबंधे ॐ पा
पाय० पापमा० २४ वायव्यकोणपदेवामबाहवेवं ॐ रोगमावा० २५ तत्स्मा
मेकपदेवामप्रबाहवेव ॐ अहिर्बुध्न्याय० अहिर्बुध्न्यमा० २६ तत्साकुतंतो
पिदक्षिणंचेतिपदद्वयेवामकूर्परे ॐ मुख्याय० मुख्यमा० २७ तत्सकपद
द्वयेवामबाहौ ॐ भल्लाटाय० भल्लाटमा० २८ तत्साकूपदद्दूयेवामबाहौ
ॐ सोमायसोममावाहयामि २९ तत्साकूपदद्दूयेवामांसे० सर्पेभ्योनमः सर्पा

83

५२

नामावा० ३० तत्पाकू पदद्वयेवामश्रोत्रे ॐ अदितये० अदितिमा० ३१ तत्पाकू
बाह्यपंक्तिगतैकपदे वामनेत्रे दितये दितिमा० ३२ तत आग्नेयकोणापुदो
धः कोणहस्ते ॐ अपानाय० अपमा० ३३ नैरृत्यपदादाधः कोणपदेमे
ढ्रे ॐ सावित्राय० सावित्रमा० ३४ वायव्यकोणाधः कोणपदेवामहस्तेज
याय० जयमा० ३५ ईशानकोणपदाधः कोणपदेमेढ्रे ॐ रुद्राय० रुद्रमा०
३६ मध्यगतनवकोष्ठकब्रह्मपदसंलग्नप्रागादिपदत्रयेदक्षिणास्तने ॐ
अर्यमणे० अर्यमणामा० ३७ तद्दक्षिणैकपदे दक्षिणहस्ते ॐ सवित्रे० सवि
तारमावा० ३८ तत्पश्चिमेब्रह्मसंलग्नपदत्रयेदक्षिणभागे ॐ विवस्वते०

५२

था

विवस्वंतमा० ३९ तत्पश्चिमपदे दक्षिणयोः विबुधाधिपाय० विबुधिपमा० ४०
तदुत्तरब्रह्मसंकल्पनुवामजठरभागे ॐ मित्राय० मित्रमा० ४१ तदुत्तरैकपदे
वामहस्ते ॐ राजयक्ष्मणे० राजयक्ष्माणमा० ४२ तत्प्राक्पदत्रये वामहस्ते
ॐ पृथ्वीधराय पृथ्वीधरमा० ४३ तत्प्रागेकपदे उरसि ॐ आपवत्साय०
आपवत्समा० ४४ ततो मध्यमनवपदे हृन्नाभ्योः ॐ ब्रह्मणे० ब्रह्मणमा०
४५ तदुत्तरवास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् पृथवास्तुप्रतिष्ठापने
विनियोगः ॐ वास्तोष्पते प्रतिजानीह्यस्मान्० इति सुवर्णादिप्रतिमामग्न्यु
त्तारणपूर्वकं संस्थाप्य मं ऊर्ध्वादीशानादिकोणेषु चरक्यै० चरकी

४३

मा० ४६ ॐ विदार्यै० विदारमा० ४७ ॐ पूतनायै० पूतनामा० ४८ ॐ पाप
राक्षस्यै० पापराक्षसीमा० ४९ ततः पूर्वादिषु ॐ स्कंदाय० स्कंदमावा० ५० ॐ अ
र्यमणे० अर्यमणमावा० ५१ ॐ जंभकाय जंभकमा० ५२ ॐ पिलिपिच्छा
य० पिलिपिच्छमा० ५३ ततः पूर्वाद्यष्टदिक्षु ॐ इंद्राय० १ अग्नये० २ ॐ य
य० ३ ॐ नैरृत्यते० ४ ॐ वरुणाय० ५ वायवे० ६ कुबेराय० ७ ॐ ईशाना
य० ८ इत्यावाह्य वास्तुपीठदेवताभ्यो नमः इति संपूज्य प्रार्थयेत् यथा मेरु
गिरेः शृंगं देवानामालयः सदा तथा ब्रह्मादिदेवानां गृहे मम स्थिरो भव
इति संप्रार्थित्त: स्वतंत्रं स्थंडिले अग्निस्थापनादि चतुर्थ्यंतो औदुंबरादि

४३

समितिलाज्यैर्वास्तुमंडलदेवताभ्योनाममंत्रेणाहुत्वादिपूर्णाहुत्यंतंकुर्यात्
ततोमंडलदेवता । स्वांगासेरैवाएषापायसबलिर्नमइत्यादिबलीन्दत्वा
कृणुष्वपाजाइतिसूक्तादिनामंडलंत्रिःसूत्रेणावेष्टयित्वाकलशोदके
नयजमानमभिषिंच्यपुनःसंपूज्ययथाशक्तिदक्षिणांदत्वाब्राह्मणान्भो
जयेदितिकेचित् शारदातिलकेतुहोमोनोक्तः तिलादिद्रव्याणांविक
ल्पइतिमयूखाकारः इदानींतुनवग्रहसंकल्पातएवप्रयोगकुर्वंतिसां
प्रदायकाः तद्यथा यथामेरुगिरेःशृंगमिति प्रार्थनांतंवास्तुपूज्यमंडला
नैर्ऋत्यांपश्चिमायांवाकुंडेस्थंडिलेवावरदानामकाग्निंप्रतिष्ठाप्याग्नेरीशा

87

४२ न्यांवास्तुमंडलादुत्तरे ईशान्यांवानवग्रहदेवता आवाह्यसंपूज्य ततईशान्यां ग्रहकलशंसंस्थाप्य तत्रवरुणंसंपूज्य देवदानवसंवादइत्याद्यैः संप्रार्थ्या न्वाधानं विदधात् अस्मिन्वास्तुकर्मण्यन्वाधानं अस्मिन्नित्यादिचक्षु ष्यांतमुक्त्वा तत्रप्रधानं आदित्यंसोमंभौमं बुधं गुरुं शुक्रं शनिं राहुं एताः प्रधानदेवताः प्रत्येकमष्टोत्तरशताष्टाविंशतिरष्टरष्टसंख्याका भिर्वार्कादिसमिच्चर्वाज्याहुतिभिः तथाईश्वरं उमां स्कंदं विष्णुं ब्र ह्माणं इंद्रं यमं कालं चित्रगुप्तं अग्निआपः भूमिं विष्णुं इंद्रं इंद्राणीं ४२ प्राजापतिं सर्पान् ब्रह्माणं विनायकं दुर्गांआकाशं अश्विनौ वास्तो

च्यति क्षेत्रपालं इंद्रं यमं निऋतिं वरुणं वायुं कुबेरं ईशानं एता देवताः
प्रधानदशांशेन तत्तत्समिच्चर्वाज्याहुतिभिः ॥ पर्जन्यं जयंतं
कुलिशायुधं सूर्यं सत्यं भृशं आकाशं० वायुं पूषणं वितथं गृहक्षतं
यमं गंधर्वं भृंगराजं मृगं पितॄन् दौवारिकं सुग्रीवं पुष्पदंतं जलाधिपं
असुरं शेषं पापं रोगं अहिं मुख्यं भल्लाटं सोमं सर्पं अदितिं दितिं आपं स
वित्रं जयं रुद्रं अर्यमणं सवितारं विवस्वंतं विबुधाधिपं मित्रं राजयक्ष्माणं पृ
थ्वीधरं आपवत्सं ब्राह्मणां चरकीं विदारीं पूतनां पापराक्षसीं स्कंदं अर्यम
णो जंभकं पिलिपिच्छां एता: प्रधानदेवता: प्रतिद्रव्यमष्टोत्तरशतसंख्याकाभि

वीयवघृताक्ततिलसमिदाज्यपायसाहुतिभिः वास्तोष्पतेमैतैर्द्रव्यैः अष्टोत्तरशत
संख्यया वास्तोष्पतिं चतुर्वारं चरुणा वास्तोष्पतिं पंचविंशतिं च बिल्वफलैस्तद्दी
जैर्वा यक्ष्ये शेषेण स्विष्टकृतमित्यादि आज्यभागांते यजमान इदं उपकल्पितं
हवनीयद्रव्यमन्वाधानोक्तदेवताभ्यः न मम मस्तु इत्युत्सृजेत् ततश्चाचार्यादयः
ग्रहेभ्यो होमं कृत्वा यवतिलसमिदाज्यपायसैः श्रीरव्यादिपीलिपिच्छांताभ्यः
त्रिपंचाशद्देवताभ्यो नाममंत्रैः प्रत्येकमष्टाविंशत्यष्टाष्टाभिसंख्याकाभि
राहुतिभिः वहुत्वा वास्तोष्पतिमेतैरेव द्रव्यैर्विविक्षितसंख्यया हुत्वाश्वलायनो
वास्तोष्पति इदि चतसृभिः प्रत्यृचमृचंते स्वाहाकारं पठन् जुहुयात् नात्र स्वाहाका

त

शांते होमः यवादिहोमे तु वास्तोष्पत इति चत्वारो मंत्राः एकैकेन च मंत्रेणाष्ट
विंशतिराहुतयः अष्टोत्तरशतं ततो एतेश्चतुर्भिर्वास्तोष्पते ध्रुवा स्थूणामिति
ऐकया च एवं पंचभिः पंचबिल्वफलानि तद्बीजानि वा जुहुयुः ततः आचार्यः
स्विष्टकृदादि प्रायश्चित्ताहोमांते यजमानो लोकपालेभ्यो ग्रहपीठदेवताभ्यश्च
बलिं दत्वा पूर्णाहुतिं हुत्वा शिखिन्यादि पंचचत्वारिंशद्देवताभ्यः शिखिने एष पा
यस बलिर्नम इत्याद्युक्तिपूर्वकं सर्वेभ्योपि बलिं दत्वा शिखिन्यादि प्रीतये कांच
नं द्विजेभ्यो ब्रह्मप्रीतये धेनुं च दद्यात् ततो ग्रहकलशावास्तुकलशोदकेन वृ
त्विग्भिरभिषिक्तो यजमानो ऋत्विग्भ्यो दक्षिणां दत्वा वाद्यादि तूर्यघोषपूर्वकं

॥४६॥

आचार्यऋत्विग्भिः सकुटुंबो यजमानः रक्षोघ्नः पवमानमंत्रैश्च गृहं त्रिः सूत्रेण
वेष्टयित्वा समंताद्विहियंवमतीभिरिद्भिर्हिरण्यमवधाय शंतातीयेन शंन इं
द्राग्नीति पंचदश ऋचः ऋत्विग्भिरिति नारायणसूक्तेनेति ॥ शंतातीयेन सूक्ते द्यावा
पृथिवीति पंचदश ऋचः ऋत्विग्भिः समुच्चयेन वृत्यन्ये तेन न च शांतिकानवोक्त
रं त्रिः प्रदक्षिणां परिव्रजन्नेक्षुत्सविच्छिन्नया चोदकधारया आपोहिष्ठाम
योभुवइति तृचेन विच्छिन्नाक्षीरधाराञ्च परितो दत्वा वास्तुपीठमध्ये नवपदे
सुरूपां पृथ्वीं ध्यात्वा पृथ्व्यै नम इति संपूज्य ॥ सर्वदेवमयं वास्तु सर्वदेवमयं पर
मिति पठित्वा ॥ ततो ग्रहस्याग्नेयकोष्ठे यजमानपदे न जानुमात्रं गर्त्तं खात्वाम

॥४६॥

ध्येगोमयेनोपलिप्यसुकुंचंदनपुष्पाक्षतैरलंकृत्यसप्तधान्यबीजानिदध्यो
दनंचाक्षिप्यस्थानंवजलपूर्णकलशंसुकुंकुमपुष्पयुतंगंधाद्यर्चितमादायजानु
भ्यामवनींगत्वातज्जलंगर्त्ते ॐ नमोवरुणायेतिमंत्रेणक्षिपेत् जलेप्रदक्षि
णावर्त्तेपुष्पेचोर्ध्वमुखेशुभं ततोपकुंभस्त्येकोष्ठियोःशाल्यादिसप्तधान्ययुता
निबीजानिदध्योदनंश्चेवाम्रफलंपुष्पाणिचक्षिप्त्वातत्र्यंघोषेणपूर्ववत्स्था
पितव्यस्ववास्तुप्रतिमामानीयपेटिकायांसंस्थाप्यपेटिकायांपिधायपठेत्
पूजितोसमयावास्तोहोमाद्यैरर्चनैःशुभैः प्रसीदपाहिविश्वेशदेहिमेगृह
जंसुखं वास्तुमूर्त्तेनमस्तेस्तुभूशय्याभिरतप्रभो लगृहधनधान्यादिसमृ

द्वंकुरु सर्वदेति ॥ सप्तद्वीपसागरां पृथ्वीं यथावहसि महीनि तथा मां वह कल्याणसंततसंपत्तिभिः सहेति ॥

स्रग आधिक्ये ऽधिकं फलं साम्ये समं न्यूनत्वे न्यूनं गर्त्तां परिगोमयेनोपलिप्य गंधपुष्पाक्षतादि क्षिपेत् ततः आचार्ये ब्रह्म ऋत्विजश्च संपूज्य तेभ्यो दक्षिणां दत्त्वा गृहपीठं देवतावास्तुपीठं च आचार्याय दद्यात् देवताश्च संपूज्य उत्तिष्ठ ब्रह्मणस्पते ० अभ्यार ० यांतु देवगणा इति विसृज्य गृहपीठं वास्तुपीठं च आचार्याय दद्यात् ततः आचार्यः प्रणीता विमोकादि शिष्टं कर्म समाप्य अग्निं विसर्जयेत् ततो यजमानो ब्रह्म त्रिरव्याहृद् हेन्त्रोन ऋातं न्यात्त्या वा ब्रह्म

णान् भोजयिष्ये इति संकल्प्य विप्रान्संपूज्य भूयसीं दत्वा प्रमादात्कुर्वतां कर्म ०
यस्य स्मृत्येत्युक्त्वा कर्म ईश्वरार्पणं कृत्वा ब्राह्मणान्भोजयित्वा तेभ्यः शिवं वास्तु
इति त्रिवारं उक्त्वा शिवं वास्त्विति विप्रस्त्री ब्रूयुः ततो यथासुखं वसु हृतो भुंजीत
इति एवं विधिना प्रतिसंवत्सरं वास्तुपूजनं कार्यं तेन गृहसंबंधि दुःखं नाभुयात्
इति महादेवतानुजेन श्रीदिवाकरसूरिणा रचितो वास्तुशांति
दिनकृत्यं दानं विवेके।
स्तुपद्धतिर्बुधतोषदा।
यजमानः कृतनित्यक्रियः पुण्यकाले गृहमध्ये चंदनेनाष्टदलं पद्मं विलिख्य तदु
परि प्रस्थमात्रं तिलान्निक्षिप्य तदुपरि स्थाप्यां सोपस्कारां स्थापयित्वा शय्योपे

४८

रिसौवर्णमयींलक्ष्मीनारायणप्रतिमां अग्न्युत्तारणपूर्वकं पंचामृतादिना अभिषि
च्यसंपूज्यप्रतिगृहीतास्वसपत्नीकंवृत्तांतेकरेगृहीत्वामंगलतूर्यघोषेणवक्ष्यमा
णामंत्रेणगृहंप्रवेशयेत् एह्येहिनारायणदिव्यरूपसर्वामरैर्वंदितपाद
पद्म शुभ्राशुभ्रनंदशुभ्रामधीशालक्ष्मीयुतस्त्वंस्वंचगृहंगृहाण नमःकौस्तुभसनो
थयहिरण्यकवृचायच क्षीरोदार्णवसुतायजगद्धात्रेनमोस्तुते नमोहिरण्य
गर्भायविश्वगर्भायवेनमः चराचरस्यजगतोगृहभूतायवेनमः भूलोकप्रमु
खालोकास्तवदेहेव्यवस्थिताः नंदंतियावत्कल्पांतेतथास्मिन्स्वेगृही त्व
त्प्रसादेनदेवेशापुत्रपौत्रादिसंततोगृहे पंचयज्ञक्रियायुक्तोवसेदाचंद्रतारकामी

४८

ति ततस्तं पूर्ववत्स्थापितं श्रि[illegible]य्यां यां उदङ्मुखउपविश्य सपत्नीकं यथाविभवं वस्त्रा
लंकारादिभिः संपूज्य स्वयं [illegible]आसनेप्राङ्मुखोदर्भेषूपविष्टोनोदर्भान्धारयमाणः पत्न्या
सहप्राणानायम्य देशकालौ संकीर्त्य मम समस्तपापक्षयपूर्वककल्पकोटिशतावधि
ब्रह्मलोकमहीयमानकामः शिलाकाष्ठपक्वेष्टकादिनिर्मितं यथोपपतिसंपा
दितं कांस्यताम्रादिभाजनसर्वधान्यलक्षणघृततैलगुडशर्करागोमहीषिब
लिवर्द्दासदासीमंचतूलिकाद्दयवितानादर्शतांबूलायतरैलालवंगादियु
तवर्षपर्याप्तिसर्वोपकरणान्वितं सदीपकाप्रद्योतितं विश्वकर्मदैवतं शक्रदैव
तं वाउदंगृहं गोत्रायशर्मणे अमुकशाखाध्यायिने सपत्नीकाय ब्राह्मणायसा

॥ ४९ ॥

लंकृताय सुपूजिताय लक्ष्मीनारायणप्रतिमासहितं तुभ्यमहं संप्रददे न मम इति दत्वा
पठेत् इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं तव विप्र प्रसादेन मम संतु
मे मनोरथाः गृहं मम विप्र हत्यर्थं गृहाण त्वं द्विजोत्तम प्रीयतां मे जगद्योनिर्वास्तु
रूपी जनार्दन इति ततः प्रतिगृहीता गृहमध्ये स्तंभं बहिर्द्वार देहलीं वा संस्पृ
श्य देवस्य त्वेति यजुषा प्रतिगृह्य स्वस्ति इत्युक्त्वा यथाशाखं कामस्तेति पठेत् ततः
सुवर्णसहस्रमारभ्य एकसुवर्णपर्यंतं वित्तशाठ्यविवर्जितां दक्षिणां दद्यात् त
तः पादुकोपानहछत्रचामरादिकं दत्वा संपन्नं गृहोपस्कार भूषणादीत्युक्त्वा सं
पूर्णमेवास्त्विति प्रतिवचनं दद्यात् ततो ब्राह्मणान्संपूज्य भूयसीं दक्षि
संपन्न

॥ ४९ ॥

यांदत्वा आशिषो गृह्णीयात् प्रमादा॰ यस्यस्मृ॰ कर्मईश्वरार्पणं कुर्यादिति॥

यएवं सर्वसंपन्नपवेश्मं विनिवेदयेत् कल्पकोटिशतं यावद्ब्रह्मलोके महीयते ॥ शैवाजं दारुजं वापि यो दद्याद्विधिपूर्वकं वसेत्क्षिरार्णवे रम्ये नारायणसमीपतः मृण्मयं वापि यो दद्याद्गृहं सोपस्करान्वितं पुरेषु लोकपालानां प्रतिमन्वंतरं वसेदिति अत्र प्रविश्य संस्पृश्य वा प्रतिगृह्णीयादित्युक्तेः प्रविश्य गृहद्वारादेहलीं प्रविश्य देहल्यां प्रतिग्रहः कर्त्तव्यः तथैव संस्पृश्य स्कूणां द्वारदेहलिं वा संस्पृश्य प्रतिगृह्णीयादिति सांप्रदायिकाः॥ इति गृहदानप्रयो॥

॥ अथ मठदानं कार्यादि॥ कृत्वा मठं प्रयत्नेन शायनासनसंयुतं वेदिकारत्नण्यादिः

५० पुण्यकाले द्विजेभ्यो याचयन्तिभ्यो वा निवेदयेत् सर्वान्कामानवाप्नोति निष्कामो मोक्षमा
प्नुयात् कुर्यात्प्रतिश्रय
गृहं प्रार्थितानां निजगेहैकदेशं वा साधूनां यो निवेदयेत् प्रतिश्रयो धर्मशाला
यक्षयापुण्यमुद्दिष्टं तस्य स्वर्गापवर्गदं सर्वकामसमृद्धोसौ देववद्दिवि
मोदत इति प्रतिश्रये सुविस्तीर्णे कारिते सजले धने दीनानाथजना
र्थाय वद्दिविकिं न कृतं स वेदिति प्रसंगात्प्रतिश्रय धर्मशालादानं
सहस्रमेव धेनूनां शतं चानडुहः समं दद्यानडुत्समं यानं विंशो दद्याया ॥५०
न समो ह्यः दद्यावाजिसमा कन्या भूमिदाने च सत्तमं तस्मात्सर्वेषु दानेषु कन्या

दानंविशेषतः॥ब्रह्मनन्दिपुराणे॥कृत्वाकन्याप्रदानंचपितरश्चपितामहाः वि
मुक्ताःसर्वपापेभ्योब्रह्मलोकंव्रजंतिते॥देवलः॥त्रिस्त्रःकन्यायथान्यायंपालयि
त्वानिवेद्यच नपितानरकंयातिनारीवास्त्रीप्रसूयिनीति॥वशिष्ठः॥ हटकान्हि
तिगौरीणांसत्यजन्मनुगंफलं धर्मेणविधिनादातुमसगोत्रेणयुज्यतइति॥स्मृत्य
वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं नामसंकीर्तयेत्तयोर्हित्वान्कन्यायश्चैव
मेवहि तिष्ठेत्सर्वमुखोदातातिष्ठेत्प्रत्यङ्मुखोवरः मधुपर्कोचितोयेनांतस्मैद
द्यात्सदक्षिणां उपदपात्रंतथाग्रेह्यमंत्रेणानेनदापयेदिति तिष्ठेदिति अनुप
द्यात्सदक्षिणां गौरींकन्यामिमांविप्रयथाशक्तिविभूषितां गोत्राय
विप्रेसर्पः॥पुनरत्रैव॥

101

५१

शर्मणेनुप्रदत्तां विप्रसमाश्रय कन्येममाग्रतो भूयात्कन्येमेदेविपार्श्वयोः कन्येमेपृष्ठतो भूयात्त्वन्नो मध्ये मोक्षमाप्नुयात् ममवंशकुले जातापालिता वत्सराष्टकं तुभ्यं विप्रमयादत्तापुत्रपौत्रप्रवर्द्धिनीमिति भूमिं गावश्च दासीं च वासांसी च स्वशक्तितः महिष्यो वाजिनश्चैव दद्यात्स्वर्णमणीनपि ततः स्वगृह्यविधिना होमाद्यंतं कर्मकारयेत् यथाचारविधेयानि मांगल्यकुसुमानि चेति

अथ कन्यादानप्रयोगः

आदौ वरं मधुपर्केण संपूज्य देशकालौ संकीर्त्य मम समस्त पितॄणां निरतिशयानंद ब्रह्मलोकावाप्त्यादि कन्यादानकल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पादयिष्यमाणं संततसाहाय्य द्वादशावरान् द्वादशपरान् पुरुषान् पवित्रीकर्तुं

५१

॥ ५२ ॥

कत्रार्मीतंममसमस्तेत्यादि ० उत्यंतं पूर्ववद्धवदुत्वा अमुकप्रवरोपेतायामुकप्रपौत्रा य अमुकगोत्रायामुकप्रवरायामुकपौत्राय। अमुकगोत्रायामुकपुत्रायामुकगोत्रा यामुकशर्मणे श्रीधररूपिणे वरायामुकप्रवरोपेतां अमुकगोत्रां अमुकप्रपौत्रीं अमुकपौत्रीं अमुकपुत्रीं ममुकनाम्नीं श्रीधररूपिणीं कन्यां वरार्थिनीं प्रजापतिदे वत्यां धर्मप्रजात्वसहकर्मभ्यस्त्वभ्यमहं संप्रददे न मम मैकन्यां प्रतिगृह्णातु भवानी ति वरहस्ते कुशाक्षताजलं निक्षिपेत्। प्रजापतिः प्रियतामिति मनसा स्मरेत्। न ममेति न वदेदिति केचित्। गौरीं कन्यामिमां विप्र यथाशक्त्यारस्य पुत्रपौत्रप्रव र्द्धिनीमित्यंतान्मंत्रान्पठित्वा। धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं नातिचरा

५२

103

आत्मनश्चश्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहंकरि
ष्ये कन्यांकनकसंपन्नांकनकाभरणैर्युतां दास्यामिविष्णवेतुभ्यंब्रह्मलोक
जिगीषया विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः इमांकन्यांप्रदास्यामि
पितॄणांतारणायच इतिमंत्रौपठित्वास्वदक्षिणहस्ते भार्यादत्तपूर्वकजलधारा
मविच्छिन्नांनवकांस्यपात्रोपरिधृतकन्यांजलमुपर्यस्य वरांजलिदक्षिणहस्तेक्षि
पन्नुवदेत् कन्यातारयतुपुण्यवर्द्धतां शिवाआपः संतु सौमनस्यमस्तु अक्षतंचा
रिष्टंचास्तु दीर्घमायुः शांतिः पुष्टिश्चास्तु तुष्टिश्चास्तु यच्छ्रेयस्तदस्तु यत्पापं
तत्प्रतिहतमस्तु पुण्याहंभवंतोब्रुवंतु। स्वस्तिभवंतोब्रुवंतु अमुकगोत्रः अमुको

मीतिवरः एवंममसमस्तेत्यादिषु ॰ पुत्रपौत्रप्रवर्द्धनीमित्यंतंवारत्रयंकार्यमिति
शौनकः तातोवरः देवस्यत्वा ॰ इत्यांप्रतिगृह्णामि ॐ स्वस्तीत्युक्त्वाकन्यायाः
दक्षिणांसमसिमन्त्रयकइदंकस्मा आदादितियथाशाखंकामस्तुतिंपठित्वा
एवंप्रतिगृह्णातितिजपित्वाधर्मसिध्यर्थंकन्याप्रतिगृह्णामितिवदेत् ततोदा
तादेशकालौसंकीर्त्यकृतस्यकन्यादानसांगतासिध्यर्थमिदंसुवर्णमग्निदे
वतंदक्षिणात्वेनतुभ्यमहंसंप्रददे न ममेतिवरहस्तेदद्यात् ॐ स्वस्तीतिवरः
ततोदाताजलभोजनभाजनानिगोमहिष्याश्वगजदासीदासभूवाहनालंकारा
दियथाविभवंसंकल्प्यपूर्वकंवरायदद्यात् अथयथाचारंकार्यमिति विस्तरस्तु

105

॥५३॥ प्रयोगमरत्नागोगेसेय: ॥ [illegible] प्रयोग: ॥ अथ कपिलादानं ॥ ननु
दशधेनूत्सृक्तवाराहे सुवर्णप्रतिमा कपिलां पूर्वांकीं द्वितीया गौरपिंगला तृ
तीयस्वैवरक्ताक्षीचतुर्थी गुडपिंगला पंचमीबहुवर्णास्यात्षष्ठीचश्वेतपिंग
ला सप्तमीश्वेतपिंगाक्षी अष्टमी कृष्णपिंगला नवमीपाटला प्रोक्तादश
मीपुच्छपिंगला एकादशविधाख्याता कपिलास्तु महामुने सर्वाएताम्
हागावस्तातारयंतिनसंशयइति ॥ आदित्यपुराणे ॥ सहस्रयोगवादघात्अपि
लांत्वेकस्यवह्निः सममेवपुराप्राहब्रह्माब्रह्मविदांवरइति ॥ तथा ॥ रुक्मश्रृं ॥५३॥
गींरौप्यखुरांसवस्त्राकांस्यदोहिनी सवत्सांकपिलांदत्त्वावंशान्सप्तस

मुद्धरेत् ॥ यावंतिचास्यारोमाणिसवत्सायां भवंतिहि ॥ सुरभिलोकमासद्यूर
मतींस्तावतीः समाइति ॥ महाभारते ॥ समानवत्सांकपिलांधेनुंदद्यात्पयस्वि
नीं सुव्रतांवस्त्रसंवीतांब्रह्मलोकेमहीयतइति ॥ अथ कपिलादानप्रयोगः ॥
पुण्यकालेकृतनित्यक्रियोघृत्यादि० ममगोसहस्त्रदानफलावाप्तिसवत्स
गोरोमसमसंख्याकामधेनुलोकनिवासकामः इमांकपिलांसुवर्णश्टंगीं
रौप्यखुरांताम्रपृष्ठींकांस्यदोहांघंटाभरणांसोपस्कारांगोत्रायशर्मणेब्रा
ह्मणायतुभ्यमहंसंप्रददेनममेतिदद्यात् ॥ मंत्रस्तुमात्स्ये ॥ कपिलेसर्वदेवानां
पूजनीयासिरोहिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे इतिमंत्रांते

॥५४॥

प्रदक्षिणीकुर्यात् ततःसुवर्णदक्षिणांदद्यात् उक्तोपस्करकपिलादानफ
लंमात्स्ये वस्त्रंचतुर्गुणंप्रोक्तंदक्षिणांचचतुर्गुणां एतैरलंकृताधेनुर्घंटा
भरणभूषिता कपिलांविप्रमुख्यायदत्त्वामोक्षमवाप्नुयान्नृदिति द्विगुणा
दक्षिणापूतामहतीकपिलास्मृता उपस्काराःसुवर्णविस्त्रपट्टंगवत्सदोहनपा
त्राद्याः॰ सामान्यगोदानंवक्ष्यमाणाः दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्र
दा सप्तजन्मकृतात्पापान्मुच्यतेदक्षासंयुता यान्यान्प्रार्थयतेकामान्तांस्ता
न्प्राप्नोतिमानवइति मम
समस्तजन्मप्रकृतपापनाशपूर्वकंपुत्रपौत्रादिसुखस्वर्गमोक्षकामोवावि

॥५४॥

स्युप्रीतिकामोवायथाकामंफलमुद्दिश्यगोत्रायाःशर्मणेसालंकृतायइमांमहा
कपिलांद्विगुणोपस्करोपेतांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात् ततःसु
वर्णदक्षिणांदक्षिणांदद्यात् क्षमापयेत् मंत्रस्तुपूर्वमेवोक्ताः॥ उत्तमहाव

यास्तुपापविध्वंसिन्यः कथितादशधेनवः तासांस्वरूपंवक्ष्यामिनामा
निचनराधिप प्रथमागुडधेनुःस्यात् घृतधेनुस्तथापरा॥ तिलधेनुस्तृतीयातुच
तुर्थीजलधेनुका॥ क्षीरधेनुस्तुविख्यातामधुधेनुस्तथापरा॥ सप्तमीशर्कराधेनुर्द

म

धिधेनुस्तथाष्टमी॥ रसधेनुस्तुनवमीदशमीस्यात्स्वरूपतः॥ कुंभात्घृतादि

५५

धेनूनां इतरासां तु राज्ञाय: सुवर्णधेनुस्तिलधेनुमप्यत्र केचिदिच्छंति मानवा:
नवमी तिलतैलेन तथान्येपि महर्षय: रसधेनुस्थाने तु सुवर्णधेनुस्तिलधेनु
र्वा जयेत् कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि
गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वत: लघ्वैणावाजिनं तद्वद्वत्सस्य परिकल्प
येत् लघुकृष्णाजिनं प्राङ्मुखं चैव ब्री स्त्रीकल्पयेद्धेनुमुदक्पादां सवत्सकां प्राङ्मु
खी प्राक्शिरसां सवत्सां उत्तरभागस्थितवत्ससहितां उत्तमां गुडधेनु: स्या
त्सदा भारचतुष्टयी वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता अर्द्धभारेण
वत्स: स्यात्कनिष्ठ: भारैकेन तु चतुर्थांशेन वत्स: स्याद्गृहवित्तानुसारत: तु

५५

धे

त्वापलशतंप्राहुर्भारस्याद्विंशतिस्तुलेति तुलास्त्रियांपलशतंभारःस्या
द्विंशतिस्तुलाइत्यमरः भारपलसहस्रात्मकोवाभवतीस्तुत
धेनुवत्सौघृतस्यतौसितसूक्ष्मांबरावृतौ शुक्तिकर्णाविक्षुपादौ
शुचिमुक्ताफलेक्षणौ सितसूत्रशिरालौतौरक्तसितकंबलौ ताम्रगंडकपृष्ठौ
तौसितचामररोमकौकुकुंभदेहोगगडुकः विद्रुमश्रृंगयुगोपेतौनवनीतस्तना
न्वितौ क्षौमपुच्छौकांस्यदोहौइंद्रनीलकतालकौ सुवर्णशृंगाभरणौराजत
क्षुरसंयुतौ नानाफलमयैर्दंतैर्घ्राणगंधकरंबुकौ
एवंरचित्वाधूपादीपादिभिरभ्यर्चयेत वस्त्रमुक्तादीनि

५६

स्मारनोमानाधिक्योफलाधिक्यं यजमानः कृतनित्यक्रि
यः पुण्यकाले शुचिरघेत्यादि० ममसमस्तपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थं
गुड धेन्वादिदानंकरिष्ये इतिसंकल्प्यविप्रंवस्त्राभरणादिभिः सपूज्यप्रद
क्षिणीकृत्यसर्वपापक्षयकामइमाममुकधेनुंगोत्रायशर्मणेब्राह्मणायसु
पूजितायतुभ्यमहंसंप्रददेनममेतितत्पुच्छसकुशातिलजलगोपुच्छंदद्यात्
विप्रस्करोदेवस्यत्वेतिप्रतिगृह्यस्वस्तीस्तु ब्रूयात्दाताएवंकामस्तुतिंपठेत्
ततः सुवर्णदक्षिणांदद्यात् यालक्ष्मीः सर्वभूतानांया
चदेवेष्ववस्थिता धेनुरूपेणसादेवीममपापंव्यपोहतु विष्णुवक्षसियालक्ष्मी

५६

क्षीस्वाहायाचविभावसो चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तमाश्रये चतु
र्मुखस्ययालक्ष्मीयालक्ष्मीधनदस्यच यालक्ष्मीर्लोकपालानांसाधेनुर्वर
दास्तुमे स्वधात्वंपितृमुख्यानांस्वाहयज्ञभुजांतथा सर्वपापहराधेनुस्तस्मा
च्छांतिंप्रयच्छमे एवमामंत्र्यतांधेनुंब्राह्मणायनिवेदयेत् एतदेवविधानंसर्व
धेनूनां उक्तरचनायास्तत्रानुपयोगा
त् ततोस्यैयंसींदक्षिणांदत्वाब्राह्मणायनिवेदयेदिति एतदेवविधानंस्यात्त
एवोपस्कराःस्मृताः अयनेविषुवेपुण्येव्यतीपाततथापुनः गुडधेन्वादयःस
र्वोउपरागादिपर्वसु यथाश्रद्धप्रदातव्यंभुक्तिमुक्तिफलप्रदमिति

५७ तत्प्रकारांतरं विष्णुधर्मोत्तरे अनु
लिप्ते महारंगे वस्त्राजिनकुशावृते धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां
धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकं स्वर्णशृंगीं रौप्यखुरां गंधघ्राणवतीं
तथा कुर्याच्च शर्करां जिह्वां गुडास्यामाविकंबलां इक्षुपादां ताम्रपृष्ठीं शुक्ति
मुक्ताफलेक्षणां प्रशस्तपत्रश्रवणां फलदंतमयीं शुभां स्रग्दामपुच्छीं कुर्वी
त नवनीतस्तनान्वितां इदृक्संस्थानसंपन्नां कृत्वा श्राद्धसमन्वितः कांस्योप
दोहनां दद्यात् केशवः प्रियतामिति इति कर्तव्यता मंत्रास्तु वन्हिपुराणे तिला
लाश्चपित्रदेवस्या निर्मिताश्च गृहे गा समेवेः ब्रह्मणा तन्मयी धेनु दत्ता प्रीणातु केश

५७

वइतिमंत्रांतरमुक्तं प्रतिमातिलधेन्वादीनां विक्रयाकृत्तं हेमाद्रौ ब्रह्मवैवर्ते
दानकाले तु देवत्वं प्रतिमानां प्रकीर्तितं धेनुनामपि धेनुत्वमन्यत्कृत्तं दानयोगतः
दातुर्वै दानकाले तु धेनवः परिकीर्तिताः विप्रस्य व्ययकाले तु द्रव्यं तदिति निश्चयः
दानसंबंधि विप्रेणाद्रव्यमागच्छते यदि तत्सर्वं विदुषान्येन क्रियते स्वेच्छया वि
क्रा कुटुंबभरणं कार्यं धर्मकार्यं च सर्वदा अन्यथा नरकं याति त्येवमाह पिता
महइति ति
लाभावे तथा दद्याद्धृतधेनुं प्रयत्नतः वासुदेवं जगन्नाथं घृतक्षीराभिषेचितं
संपूज्य पूर्ववत्सुष्ठ्येगं धूपदीपादिभिर्नरैः गव्यस्यसर्पि

५८

घटं कुंभं संपूज्य माल्यादिभूषितं कांस्यपिधनसंयुक्तं सितवस्त्रयुगेनच हिरण्यस
हितं तद्दिव्यमणिविद्रुममुक्तिकैः अत्रपलसहस्त्रपरिमाणः कुंभः द्वादशपला
धिकपंचशतपलाधिकोवा । यिक्षुर्यष्टिमयान्यादानूराप्यमयांस्तथा । सौव
र्णचाक्षिणीकृत्यतु शृंगेचागरुकाष्ठजे सप्तधान्यमयेपार्श्वेपत्रोर्णेनचकंबले
पत्तोर्णधौतकौशेयं कर्पूरघ्राणोफलमयास्तनान् शर्करयाजिह्वां गुडक्षी
रमयंसुखं क्षौमपुच्छंरोमाणि सितसर्षपैः ताम्रपृष्ठं एतादृशींकृत्वाविधि
नासंपूज्यतथाब्राह्मणंयथाविभवंवस्त्रालंकारादिभिः संपूज्यदद्यात् विधि
स्तु प्राग्वत् घृतंगावः प्रसूयंते घृतमस्यांप्रतिष्ठितं घृतम

५८

विश्वेदेवाश्च घृतं मे संप्रदीयतामिति दानफलमपि चैव घृतक्षीरवहा नद्याय
स्तपायसकर्दमाः तेषु लोकेषु सर्वेषु पुण्येषु मुपजायते सकामानामियं व्युष्टिः
कथिता नृपसत्तम व्युष्टिः फलं विष्णुलोकं नरो याति निःकामाद्धेनुदानतः इति
दक्षिणा तु हिरण्यमेवेति हेमाद्रिः स्वर्णप्रसूतिरात्त्या चोक्तं मदनरत्ने

जलकुंभं नरव्याघ्रं सुवर्णरज
तान्वितं सुवर्णशृंगं रजतखुरान्वितमिति रत्नगर्भमंत्रौषैस्तक्रयांस्यैर्धान्यैः सम
न्वितं सितवस्त्रयुगाच्छिन्नां दूर्वापल्लवशोभितां कुष्टमांसीमुरोसीरवालकै
मह्युकैर्युतां प्रियंगुपत्रसहितां सितवस्त्रोपवीतनं सच्छत्रं सदुपानत्कं दर्भवि

ष्टरसंछन्नितं चतुर्भिः संस्कृतं भूपतिलपात्रैश्चतुर्दिक्षुं स्थगितं दधिपात्रेणाच्छ
नहेमाढ्यवक्त्रामुखं तिलपात्राणि ताम्रमयानि दधिपात्रं कांस्यमयं उपोषितो वा
सुदेवं जले शायमभ्यर्च्य संकल्प्य जलधेनुं विप्रं च वस्त्रालंकारादिभिः संपूज्य स
वत्सां जलधेनुं गुडधेनुं च दद्यात् ततो या लक्ष्मीरित्यादिपूर्वोक्तमंत्रैः संप्रार्थये
॥ इति जलधेनुः ॥ अथ क्षीरधेनुदानं प्रारभ्यते ॥ क्षीरधेनुं प्रवक्ष्यामि तां
त् निबोध नराधिप अनुलिप्ते महीपृष्ठे गोमयेन नराधिप गोचर्ममात्रमानेन कु
शानास्तीर्य सर्वतः तस्योपरि महाराज न्यसेत् कृष्णाजिनं ततः तत्र गोमयेन
कुंडलीकां कृत्वा क्षीरकुंभं तत्र स्थाप्य चतुर्थांशेन वत्सकं शृंगाणि च दनाग

रुकानिप्रशस्तपत्रश्रवणांतिलपात्रोपरिन्यस्तां मुखंगुडमयंहैमंवाजिह्वांशर्क
रया फलैः दंताः मुक्ताफलेक्षणा इक्षुपादादर्भरोमा सितकंबलकंबला ए
ताहस्तरींसवत्सामभ्यर्च्यद्विजंचवस्त्रालंकारादिभिः संपूज्य ० अद्येत्यादि गोत्रो
यन्नामिणेब्राह्मणायसालंकृतायइमांक्षीरधेनुपूर्वोक्तसोपस्कारयुतांसमस्त
पापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिवदेत् देवस्यत्वेत्यस्तीसूक्तायथा
शास्त्रंकामस्त्वंतिपठेत् ततोयालक्ष्मीरित्यादिमंत्रैः प्रार्थयेत् ॥ इति क्षीरधेनु
मधुधेनुंप्रवक्ष्यामिसर्वपापप्रनाशिनी अनु
लिप्यमहीपृष्ठेकृष्णाजिनकुशोत्तरं धेनुंमधुमयींकृत्वासंपूर्णांघृतपूरितां त

६०

द्रव्यचतुर्थभागेनसवत्सांपरिकल्पयेत् धेनुंद्विजंचपूर्ववदभ्यर्च्य जद्देत्यादि॰गो
त्रायशर्मणेसालंकृतायसौर्पामुखीं अगरुचंदनशृंगीं ताम्रपृष्ठीं रौप्यसूत्रपुछां इ
क्षुपादां सितकंबलांगुडमुखीं शर्कराजिह्वां मौक्तिकनेत्रां फलदंतां दर्भ
रोमां प्रवालघंटां वर्णां नवनीतस्तनीं सप्तधान्योपेतां ताम्रपात्राणि च
तुर्दिक्षु विन्यसेत् वस्त्रयुग्मेनाच्छाद्य घंटाभरणभूषितां कांस्यदोहिनीं सुपू
जितां पुच्छदेशोपविष्टायां मधुदानाचं तायात इति मंत्रमुक्त्वा इमां मधुधेनुं सर्व
पापक्षयकामस्तुभ्यमहं संप्रददे न मम इति ततः सुवर्णदक्षिणां दत्वा या लक्ष्मी
रित्यादि पूर्वोक्तमंत्रैः प्रार्थयेत् ॥ इति मधुधेनुदानं ॥ अथ शर्कराधेनुदानं

६०

तच्चशर्कराधेनुंशृणुराजन्यथार्थतः अनुलिप्ते महीपृष्ठे कृष्णाजि
नकुशोत्तरे भारचतुष्टयपरिमिता तच्चतुर्थांशेनवत्सः भारद्वये अष्टमांशाद
तिस्वशक्त्यावाकुर्या सर्वधान्यानिचतुर्दिक्षुसंस्थाप्यत्र्यधेत्यादि० गोत्राय
शर्मणेसालंकृतायइमांशर्कराधेनुंसुवर्णशृंगींमौक्तिकनयनींकुंउमुखींपि गु
ष्टमयीजिह्वांकंबलपट्टसूत्रेणविष्टितांकंठाभरणभूषितांइक्षुपादांरौप्य
खुरांनवनीतस्तनींप्रशस्तपर्णश्रवणांसितचामरभूषितांपंचरत्नसमायुक्तां
दर्भरोमांकांस्योपदोहिनींगंधपुष्पाद्यर्चितांसमस्तपापक्षयकामस्तुभ्यमहं
संप्रददेनममेतिदद्यात् सुवर्णंदद्यात् ततोयालक्ष्मीरित्यादिमंत्रैःसंप्रार्थ्य

स्त्रयसीं दद्यात् विप्रमुखं नेक्षेदिति पंचरत्नानित्वपरार्के कनकंहीरकंनी
लंपद्मरागंचमौक्तिकं पंचरत्नमिदंप्रोक्तंमृषिभिःपूर्वदर्शिभिरिति ॥अतिरा
तत्रघृतलेपनकुंडाकृष्णाजिने
आस्तीर्णसप्तधान्योपरिदधिकुंभंसंस्थाप्यचतुर्थांशेनवत्सं कृत्वागोत्राय
त्रामणिसाद्यंकृत्वायसौवर्णमुखींप्रशस्तपंचवर्णांमुक्ताफलेक्षणांचंदना
गरुशृंगीमुखींविद्रोषगंधद्रव्यैर्युक्तांताम्राकृत्याकृतजिह्वांश्रीखंडेनकृत
घ्राणांफलमयदंतांसितकंबलछन्नांदर्भरोमांस्त्रचमयपुच्छांरौप्यखुरींवा
नवनीतस्तनीमीक्षुपादांसर्वाभरणभूषितांवस्त्रयुग्मेनवेष्टितांगंधपुष्पा

र्चितांइमांदधिधेनुंसर्वपापक्षयकामोदधिक्राणाइतिमंत्रंपठित्वातुभ्यमहं
संप्रददेनममेतिदद्यात् गुडधेनुमंत्रेणवादद्यात् ततःसुवर्णदक्षिणांदत्वायो
लक्ष्मीइत्यादिमंत्रैःप्रार्थयेत्दिति ॥इतिदधिधेनुः॥ अथरसधेनुदानं रसोदे॥
रसधेनुंमहाराजकथयामिसमासतः अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्त
रे इक्षुरसस्यघटंपूरयित्वातच्चतुर्थांशेनवत्संसंपाद्यअर्घेत्यादि ० गोत्रायत्रा
र्मणेसालंकृतायइमांसुवर्णशृंगाभरणासंयुतांरौप्यखुरांवस्त्रपुच्छांइक्षुपादां
पुष्पकंबलांताम्रपृष्ठींपुष्परोमांव्रीहियुतांचतुर्दिक्षुदीपसमायुक्तांसर्वगंध
विभूषितांपूर्वादिदिक्षुतिलपात्रचतुष्टयवृत्तांसुपूजितांसर्वपापक्षयपूर्वकं

६२

कविंत्राकुलोद्धरणकामस्तस्यमहंसंप्रददेनममेतिसुवर्णदक्षिणांदद्यात् मंत्र स्तुगुउधेनुउक्ताएवन्त्रोषोपस्कारोभ्र एवमुच्चारयित्वातुदीयतेवैद्विजन्मने द त्राएर्वान्यरांश्चैव आत्मानंचैकविंत्रातिरिति ॥ इति सवत्सधेनुदानं ॥ अथ प्रत्यक्षगोदा गौरेकस्यैवदातव्याश्रोत्रियायकुटुंबिने सहिता रयतेएर्वान्स्सत्सतचसत्पतेति सुशीलांलक्षणवतींयुवतींवत्ससंमि तां बहुदुग्धवतींस्निग्धांधेनुंदद्याद्विचक्षणे ॥ अथ गोदानप्रयोगः ॥ कृतनित्यक्रि यः पुण्यकाले अद्येत्यादि ० गोत्रस्यामुकशर्मणः पृथ्वीदानसमस्तकामः सर्वपाप क्षयकामोविष्णुकामोवा यथाशक्तियथाज्ञानंगोदानमहंकरिष्येइतिसंकल्प्य य

६२

जमा० गोत्रः अमुकशर्माहं ब्रा० अमुकसंगोत्रं अमुकशर्माणं ब्राह्मणं गोदा
नार्थं एभिर्वस्त्रादिभिस्त्वामहं वृणे वृतोस्मीति प्रतिवचनं संवत्सां धेनुं च द्विजे
च यथाविभवं वस्त्रालंकारादिभिः संपूज्य गोः शृंग मस्तकादिस्तनांतस्थानादि
षु देवताः पूजयेत् तद्यथा शृंगमूले ब्रह्माविष्णुभ्यां नमः ब्रह्माविष्णू पूजया
मि शृंगाग्रे सर्वतीर्थेभ्यो नमः सर्वतीर्थानि पूजयामि शिरोमध्ये शिवाय
नमः शिवं पू० ललाटे देव्यै० देवीं पू० नासिकायां षण्मुखा० षण्मुखं
पू० नासापुटयोः कंबलाश्वतराभ्यां० कंबलाश्वतरौ पू० कर्णयोः अश्विभ्यां०
अश्विनौ पू० चक्षुषोः शशिभास्कराभ्यां० शशिभास्करौ पू० दंतेषु वाय

६३ वे० वायूं पू० जिह्वायां वरुणाय० वरुणं पू० हुंकारे सरस्वत्यै० सरस्वतीं पू० गं
डयोः पक्षमासा[illegible]भ्यां० पक्षमासौ पू० ओष्ठयोः संध्याभ्यां० उभे संध्ये
पू० ग्रीवायां इंद्राय० इंद्रं पू० कुक्षिदेशे रक्षोभ्यो० रक्षांसि पू० उरसि साध्ये
भ्यो० साध्यान् पू० पादेषु धर्मं पू० जंघासु अधर्माय० अधर्मं पू० खुरमध्ये
गंधर्वेभ्यो० गंधर्वान् पू० खुराग्रे पन्नगेभ्यो० पन्नगान् पू० खुराणां पश्चिमा
ग्रे अप्सरोभ्यो० अप्सरसः पू० पृष्ठे एकादशरुद्रेभ्यो० एकादशरुद्रान्
पू० सर्वसंधिषु वसुभ्यो० वसून् पूजयामि श्रोणितटे पितृभ्यो० पितॄन् पू० ६३
लांगुले सोमाय० सोमं पू० आदित्यरश्मिभ्यो० आदित्यरश्मीन् पू० गोम

त्रेगंगायै० गंगां प० गोमयेयमुनायै० यमुनां प० क्षीरेसरस्वत्यै० सरस्वतीं प० द
ध्निनर्मदायै० नर्मदां प० घृते अग्नये० अग्निं प० रोमसु अष्टाविंशतिदेवको
टिभ्यो० अष्टाविंशतिदेवकोटीः प० उत्तरपृथीव्यै० पृथिवीं प० योरघेषुसमु
द्रेभ्यो० समुद्रान् प० ॥ एतादेवता ॐ गंधपुष्पं पूज्य ॥ अंगदेवतादि ॥ गोत्रायशर्मणे
सुपूजिताय एष्वीदानसमफलकामः सर्वपापक्षयकामो विष्णुप्रीतिकामो वा
इमां प्रत्यक्षधेनुं सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं घंटाभ्रेवेयभूषितां क्षत्का
ळैकांरमुक्तां कांस्योपदोहनीं सितवस्त्रद्वयोपेतां सर्वाभरणभूषितां सोपस्क
रां रुद्रदैवतां तां तुभ्यमहं संप्रददे न मम इति तीलपात्रे घृताक्तं गोपुछं कृत्वा

127

६४ विप्रहस्ते सतिलकुशोदकं दद्यात् यज्ञसाधनभूता या विश्वस्या
न्नप्रदायिनी विश्वरूपधरो देवो प्रीयतामनया गवा ततो दानप्रतिष्ठासि
द्ध्यर्थं सुवर्णं दक्षिणां दत्वा प्रार्थयेत् नमो गोभ्यः श्रीमतिभ्यः सौरभेयीभ्य ए
व च नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः गावो ममाग्रतः संतु गावो मे सं
तु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहमिति पठित्वा धेनुं द्विजं च प्रदक्षि
णीकृत्य किंचिदनुव्रजेदिति

पाद्मे श्वेता सुखप्रदा प्रोक्ता चंद्रलोकप्रदायिनी कृष्णा स्वर्गप्रदा प्रो ६४
क्ता गौरी स्यात् कुलवर्द्धिनी रक्ता रूपप्रदा प्रोक्ता पीता दारिद्र्यनाशिनी पुत्रप्र

दालक्षसारानीलाधर्मविवर्द्धिनी कपिलासर्वपापघ्नीनानावर्णाचमोक्षदे
ति समानवर्णगोवत्सदानफलं ॥ महाभारते ॥ रोहिणींतुल्यवर्णांतुसवत्सां
चपयस्विनीं प्रदत्वावस्त्रसंवीतांसूर्यलोकेमहीयते वातरेणुसुवर्णांतुसव
त्सांकांस्यदोहिनीं प्रदद्याद्वस्त्रसंवीतांवायुलोकेमहीयते समानवत्सांधूम्रां
तु धेनुंदद्यात्पयस्विनीं धूम्रवस्त्रसमायुक्तांयमलोकेमहीयते अग्नेःसमानव
र्णांतुसंवत्सांकांस्यदोहिनीं प्रदद्याद्वस्त्रसंवीतांवारुणंलोकमश्नुते हिरण्य
वर्णांपिंगाक्षींसंवत्सां॰ प्रदद्याद्वस्त्रसंवीतांकौबेरंलोकमाप्नुयात् पलाल
धूम्रवर्णांतुसवत्सां॰ प्रदद्याद्वस्त्रसंयुक्तांपितृलोके॰ संवत्सांवरींदत्वाशि

९५

तिकं ग्राममलंकृतां विश्वेदेवमसंबाढं स्थानं श्रेष्ठं प्रपद्यते समानवत्सां गौरीं तु
धेनुं ० सवत्सां कांस्यदोहां तु वस्त्रनां लोकमाप्नुयात् वत्सोपपन्नां निष्कांशीस
वैरत्नसमन्वितां गंधर्वाप्सरसो लोकां दत्वा प्राप्नोति मानवः इति संकल्पं तु त
त्तल्लिंगं संकीर्त्य दद्यात् ॥ इति समानवर्णगो ॥ वत्सदानफलं ॥ अथ कृष्णधेनुदा

२

नं मात्स्ये ॥ अथैत्यादि संकल्पादिकं तु पूर्ववत् ॥ मंत्रास्तु ॥ कृष्ण धेनो नमस्तुभ्यं ब्र
विष्णुशिवात्मके त्रिजन्मार्जितपापानि ध्रुवं दानात्सनात्रायेदिति ॥ अथ हेम

९५

शृंगीदानं मात्स्ये ॥ दशसौवर्णके शृंगे खुरे ... राः पंचपलान्विताः पंचाशत्पलि
कां कांस्यं तां स्त्रं चापि तथैव च ९ वस्त्रं च त्रिगुणं धेन्वा दक्षिणा च चतुर्गुणा

मिति एवंविधिवद्दातुः फलमुक्तं नंदिपुराणे विधिनां तु यथादत्त्वा पात्रे धेनुः
सदक्षिणा दाता तारयते जंतुन् कुलानामयुतैः शतमिति ॥ महाभारते ॥ प्रा
सादा यत्र सौवर्णाः शय्यारत्नोज्वलास्तथा वराप्सरसो यत्र तत्र गच्छंति
गोप्रदा इति ॥ तथा ॥ यावंति रोमाणि सर्वाणि धेन्वास्तावंति वर्षाणि महीयते
सः स्वर्गाच्युतश्चापि ततो त्रिलोके कुले समुत्पत्स्यति गोमतां सः ॥ तथा ॥ सा
लंकृतां सवत्सां च धेनुं संपूज्य भक्तितः सरत्नपूर्णा पृथिवी तेन तावं न संश
य इति ॥ इति स्वर्णगोदानं ॥ इति सर्वगोदानानि ॥ ॥ अथ कार्पास
धेनुदानं ॥ मत्स्ये ॥ अतः परं प्रवक्ष्यामि धेनुं कार्पासकीं भुवि सर्वविघ्न

६६

स्यगुस्यर्थंब्रह्मणः स्वांशकं कृतं साचकर्पासभारेण श्रेष्ठा धेनुः प्रकीर्तिता
मध्यमा च तदर्धेन तदर्धेन कनीयसी पूर्ववद्वत्सं धान्यं च हिरण्यं च तथैव च
वत्सं कृत्वा चतुर्थांशाद्दानमात्रेऽभिधीयते कुर्वीत पूर्ववद्वत्सं धान्यादुपस्तरादि
ति ततो वाराहोक्त तिलधेनुदानवत् क्रियाकलापादि संकल्पादारभ्य दानां
तं कृत्वा प्रार्थयेत् ॥ मंत्रस्तु ॥ हेमकुंदेपुंसद्वन्नोक्षीरार्णवसमुद्भवे सोमप्रि
ये सुधान्वारव्ये सौरभेयी नमोस्तु ते दत्तेयमिंदुनाथाय चंद्रांशकायामृताय
च अत्रिनेत्रप्रजाताय सोमराजाय वै नमः यस्त्वेवं परया भक्त्या ब्राह्मणा
य प्रयच्छति स याति चंद्रलोकं वै सोमेन सह मोदत इति ॥ इति कार्पासधेनु

६६

तत्रयुधिष्ठिरंप्रतिकृष्णः शृणुराज
न्प्रवक्ष्यामिलवणाख्येहकल्पितां गोमयेनानुलिप्तेतुदर्भसंस्तरसंस्थितां
आविकंचर्मविन्यस्यपूर्वाग्राभिमुखंस्थितं वस्त्रेणाछादितंकृत्वाधेनुंकुर्व
रीतशक्तिमान् अष्टकेनैवकुर्वीरतबहुवित्तोपकल्पितां गांविप्रचययथावि
भवंवस्त्रालंकारादिभिःसंपूज्य अद्येत्यादि० गोत्रायशर्मणेसुपूजितायइ
मांलवणधेनुंपुष्टस्तनींसिंधुशुक्तिकर्णांसक्तुपिंडकयोलायवास्यांकंबल
पट्टसूत्रंगैरेयकांताम्रपृष्ठींगुडपानांकंबललांमयुपेनिकांसर्वाभरणभू
षितांसर्वपापक्षयकामोविष्णुप्रीतिकामोवातुभ्यमहंसंप्रददेनममेतिपुत्रभार्यो

६७

दियुतःप्रदक्षिणीकृत्यदद्यात् ॥अथ मधुधेनुदानम्॥ मंत्रास्तु॥ लवणेवैर
साःसर्वेतिष्टंतिसर्वदेवताः सर्वदेवमयेदेविलवणाख्येनमोस्तुतइति पुराणां
तरेतुषोडशप्रस्थमितांचतुर्थांशेनवत्सइतिउक्तंलवणधेनुदानं ॥अथसु
वर्णधेनुदानंविष्णुपुराणे॥ सुवर्णधेनुश्चाप्यत्रसुवर्णाश्चचतुर्दश सुनिर्मि
श्चसुवर्णैश्चसप्तभिर्मध्यमामता चतुर्भिश्चकनीयाश्चस्याच्चतुर्थांशेनवत्स
कः गुडधेनुविधानेनदत्तासर्वफलप्रदा अत्रविशेषाषोडशेष्वेणवत्सइतिकेचि
त् ॥तथा[illegible]॥ प्रवालशृंगीघृतपात्रस्तनवतींपद्मरोमांकर्पूरागरु
नासिकांमिष्टान्नरसवासितांचांरवंशृंगांतरांशुक्तिरुलाटस्थांनारीकेल

६७

श्रवणांगुष्ठजानुकां पंचगव्यापानवतीं कांस्यदृस्तां प हस्तचलांगल्लांसप्त
धान्यसमायुक्तां फलसहस्रस्य स्वर्गे निवासकाम अमुकगोत्राय अमुकशर्मणे सुपूजि
तायतुभ्यमहं संप्रददे न मम इति दद्यात् ॥ मंत्रश्च ॥ सुवर्णधेनुं विप्राय प्रतिपा
द्य हृष्टो नरः हिरण्यरेता पुरुषः पुराणः सुवर्णपिंगलः सत्सहेमच्छविः स्वयं
विश्वात्मा प्रियतां मम इति अनेनैव तु मंत्रेण धेनुदानं प्रकीर्तितं अश्वमेध
सहस्रस्य फलमाप्नोत्यसंशयः कुलानां च सहस्रस्य स्वर्गे नयति गोप्रदः इति ॥
इति सुवर्णधेनुदानं ॥ अथ वंध्यासहस्र सुवर्णधेनुदानं ॥ वायुपुराणे ॥ वंध्या तु च
तुर्विधोक्ता वंध्या काकवंध्या स्त्री प्रसूता मृतप्रजा इति काकवंध्या तु काक

135

वदेकयत्या शेषास्यष्टाएव धनत्पविशेषमाह॥ गर्कादिषया के॥ हिरण्येनत्य
धान्नात्तयोसवत्सांकारयेत् दृढां धेनुःपलनवत्यस्यपादेनविधिरब्रवीत् रौ
प्यखुरारत्नपुच्छेनियोज्यघंटामुभयोरपिगलेबध्वारत्नमयंतिलकंललाटे
बध्नीयात् एतामर्चीमभ्यर्च्यपायसंनैवेद्यंदत्वा मोदकान् अपूपान्गुडलव
णाजीरकंसुवर्णसुवर्णदक्षिणांकंचुकंचम्रपैनिधायएकंवायनकंधेनवे
अन्यानिपतिपुत्रवतीभ्योब्राह्मणस्त्रीभ्यः षडुष्टोवादद्यात् ततःवेदपार
गमलोलुपंब्राह्मणंरिणाग्रस्तंदरिद्रंकुटुंबिनमाहूयवस्त्रायथाविभवंच
स्त्रालंकारादिभिः संपूज्यततोधेनुसवत्सांसंपूज्य अग्निमुपसमाधाय

समिदाज्यचरुद्रव्यैः सोमो धेनुमितिमंत्रेणैकैकमष्टोत्तरशतसंख्यया हुत्वा
स्वयमुदङ्मुखः प्राङ्मुखायोपविष्टाय गोपुच्छं तद्धस्ते निधाय दद्यात् ॥ अथ
गोत्राय शर्मणे सुपूजिताय इमां सालंकृतां सुवर्णधेनुं सवत्सां रौ
प्यखुरां रत्नपुच्छां घंटारत्नतिलकां वायनोपेतां वस्त्रयुगच्छन्नां मुक्तालां
गूलां मम जीवत्पुं संतानप्रतिरोधकीभूतसकलदुरितनिरासपूर्वक आयु
ष्मत्पुत्रावाप्तिकामो वं ध्यात्वहरा इमां सुवर्णधेनुं यथाशक्ति सोपस्का
रां रुद्रदैवत्यां तुभ्यमहं संप्रददे न ममेति कृत्वा तिलोदकं दद्यात् ॥
धेनुर्यांगीरसस्तत्रैव त्रिष्टुप्सुरभिस्तथा दुहिता च तथा भानोर

६९

ग्नेष्ववरूपाँस्यच याश्चगावः प्रवर्त्ततेवनेषुपवनेषुच प्रीयंतुममसदापुत्रपौ
त्रप्रवर्द्धिनी प्रयच्छंतुदिवारात्रमविच्छेदेचसंततं ॥ देवस्यत्वा० ॥ स्वस्ति
स्तुचत्वायधात्रारवंकामस्क्तांतिपठेत् ततः सुवर्णदक्षिणांदत्वाप्रार्थयेत् ॥
मंत्रार्थ ॥ वंध्यात्वंकाकवंध्यात्वंकन्याप्रसवएवच तथैवमृतवंध्यात्वंदोषं
ममचतुर्विधं दानेनानेनहरतुयासाकामदुघाममेतिगांप्रार्थयित्वाप्रदक्षि
णीकृत्यविसर्ज्यपयस्वींदक्षिणांदत्वायथाशक्तिब्राह्मणान्भोजयित्वा
जीवत्सुसंतानावाप्तिरस्त्वितितान्संप्रार्थ्य जीवत्सुसंतानावाप्तिरस्त्विति
तेब्रूयुः ततः सुहृद्युतोभुंजीतेति ॥ इतिवंध्यात्वहरसुवर्णधेनुदानं ॥ अ
॥ थोपस्यतोसुरभीदानमात्स्ये ॥

६९

रूक्मशृंगीं रौप्यखुरां मुक्तालांगूलभूषितां कांस्योपदोहनां राजन्सवत्सां
द्विजपुंगवे प्रयच्छमानो यो दद्याद्धेनुं द्रविणसंयुतां तावद्वत्सो योनिगर्भया
वद्गर्भं न मुंचति तावद्गौः पृथिवी ज्ञेया सशैलवनकानना ॥ देवलः ॥ अलं
कृत्य उक्तविधिना सुवर्णत्रिपलान्विता देया च द्विपला मध्यमा पलैका दक्षि
णाधमा वराहेतु सुवर्णसाहस्रं तदर्द्धं मुख्यमुक्तं सुवर्णस्य तदर्द्धेन तद
र्द्धार्द्धेन वा पुनः तस्याप्यर्द्धशतं वाऽपि पंचाशच्च ततोऽर्द्धकं यथाशक्त्यापि दा
तव्यां वित्तशाठ्यं विवर्जितेति ॥ [illegible] ॥ उभयतोमुखीं सुवर्णनिष्केण दत्वा
सद्यः शुद्ध्येत्पातकेभ्यो ऽश्वमर्त्य इति सुवर्णनिष्कदक्षिणायुतेनापि दद्यादित्यर्थः

अत्रनिष्कश्चत्वारिन्नान्माषकएवग्राह्यः अत्राक्तोविंशतिमाषकोवा ॥ अथ
दानप्रयोग अमुकस्य इत्यादि ॥ इमांयत्तोमुरवीदानंकर्तुंगोवत्सपूजांकरि
ष्येइतिसंकल्प्यद्विजंकुटुंबिनंदरिद्रंवेदपारगसुशीलंचलायेथाविसवव
स्त्रालंकारादिभिःसंपूज्यगामपिसंपूज्य ॐ त्वंमहीमवनी विश्वधेन्वांतु
वीरतवेवयायक्षरंती अरमयोन्नमसैर्जदर्णाःसुतरणाअरुणोरिंद्रसिधृ
निति गामनुमंत्र्यप्रदक्षिणीकृत्य ॥ अमेत्यादि ॥ गोत्रायशर्मणेअमुकशा
खाध्यायिनेइमांधेनूपस्काराममेयंतोमुरवीससमुद्रसद्वीपवनोपेतपृथ्वी
दानसमफलावाप्तये धेनुवत्सरोमसंख्यायुगदेवलोकगमत्वपितृपिताप्र

पितामहकुलशतनरकोत्तारणापूर्वकघृतक्षीरवहबहुकुल्याकदधिपायस
कर्दमदेशाधिकरणकेप्सितकामोरुद्रदेवत्यामिमांतुभ्यमहंसंप्रददेनममेति
दद्यात् सघृततिलपूर्णकांस्यपात्रयुतगोपुछंन्तहस्तजलकुशादत्त्वाप्रार्थये
त् इमांग्रहाणपात्रयमुर्वीभवोत्तारतामात्मैव ममवंशविशु
द्धेश्वसदास्वस्तिकरोभवेति विप्रादेवस्यत्वेतिप्रतिगृह्यस्वस्तीत्युक्त्वाय
थाशक्तिकामस्तुतिंपठेत् ततःसुवर्णसहस्रभारस्यपंचविंशतिंचतुर्द्दिसु
वर्णमितांदद्यात्ततोनन्यूनमिति इरावतीधेनुमतीहिभूतभू
यवसिनीमनवेदशस्या व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितो

७१ मयूरैरेवः १ स्योनापृथिवीनोभवान्रक्षरानिवेशनी यच्छानःशर्मसप्रथाः २
प्रतिगृह्णामिमंधेनुंकुटुंबार्थेविशेषतः स्वस्ति
रस्तुमेनित्यंरुद्रमातर्नमोस्तुते इतितत्वागृहीतांयांदक्षिणेनपाणिनावत्स
माकृष्यन्यंठेत् ॐसैनुसंनवेषामेवदद्देवानांजनिमानिविप्रः त्वातंमापुर
आयासीररक्षंनधन्नोनोजरासानिरत्ययमितिमंत्रेणगामाकृष्येत् निष्को
सितेसलिकयंतरमाह … प्राणानायम्य अद्येत्यादि० कृतस्यो
सयतोमुरवीदानकर्मणः सांगतासिध्यर्थंदेवादिमंत्रैः स्तर्पणां होमंचकरिष्ये
इतिसंकल्प्य स्थंडिले अग्निवाधायाअग्निंप्रतिष्ठाप्यान्वादध्यात् असि
न्नन्वाहिताग्नावित्यादिचक्षुषी आज्येनेत्यंतमुक्त्वा तत्रप्रधानंत्रिः पृथिवीं

७१

त्रिःगौरींसकृदाज्येनप्रजापतिंचतुरत्रीत्यावृत्याआज्येनशेषेणस्विष्टकृतमि
